मत्याख्यातनिर्तिनिवाच्यं। सन्नन्तात् घञः। त्राहुतिविचतुः। अजुगुप्सत अलोलुपदित्यादौ चङीति द्वित्वा
भावार्थं तस्यावश्यकत्वात्। पदिसंबंद्धित्वप्रकरणमेकं लक्षणं स्वीकृत्य मलक्षे लक्षणे सकृदेव प्र
वर्तते इत्यनेन निर्वाहे तन्न्यासग्रहणं न कर्तव्यमिति चेत्। तर्हि तेनैव पुनर्द्वित्वाप्रवृत्तौ प्रकृतभाष्या
नुपपत्तिः स्यादेवस्येव॥ अत्र नवीनाः। अनभ्यासग्रहणं प्रत्याख्यानपरं भाष्यादजुगुप्सत अलोलु
पदित्यादिप्रयोगाणामनभिधानं रूपं प्रत्याख्येमाहुः। मम तु प्रतिभाति सूत्रवार्तिकभाष्यादिसक
लसंमतत्वमेतेषां तत् हि सूत्रकारेणैतेषां साधुत्वार्थं अनभ्यासग्रहणं कृतं वार्तिककारे
णानभ्यासग्रहणं विनापि द्वितीयद्वित्वे प्रथमप्रतिषेधः इति वार्तिके द्वितीयप्रथमशब्दयोस्था
निनिमित्तोभयवाचकत्वाद दृष्टिषत्तीत्यादौ प्रथमैकाचः स्यानितः अजुगुप्सत अलोलुप

३९ दित्यादौ तु द्वितीयचतुर्भिन्नकद्वित्वे प्रथमसन्धिचतुर्भिन्नकयोर्नञ्वनिषेधः । माध्यरीत्या तु स
39 कलद्वित्वप्रकरणस्यैकलक्ष्ये तत्त्वं स्वीकृत्य लक्ष्ये लक्षणं सकृदेवेत्यनेन निर्वाहः । एवं च सकलम
प्यतेनाभिधानकथनं साहसमित्तिदिक् ।। ङमो ह्रस्वादचि ङमुण्नित्यं ।। ननु हेमपरे वा मयण्जो
वो वेति विकल्पद्वयमध्यपाठादेव नित्यत्वे सिद्धे नित्यग्रहणमर्थ्यमिति चेत्तन्न । तस्य क्वचिद्विकल्प
बोधनार्थं तस्यावश्यकत्वात् तथा च नपरे नः इत्यादि सूत्रत्रये च केचिद्विकल्पासिद्धिः । यत्तु विभाषा
द्वयमध्ये ये विधयस्ते नित्या इति न त्को सेडिति सूत्रभाष्ये क्तेरिति भावः । न च तन्मध्यपाठे न नि
त्यत्वकल्पने तन्मध्यपतितानां नपरे नः इत्यादीनामपि नित्यत्वापत्तिः । स्वरितत्वबलादनुवृ
त्तस्य पुनर्वा ग्रहणान्निवृत्तौ कल्प्यमानायां स्वानन्तर एव तत्कल्पनोपपत्तावन्यत्र तत्कल्पने मा
नाभावात् । तस्मादुत्तरत्र वा ग्रहणसामर्थ्यात्पूर्वसूत्र एव वा ग्रहणस्य निवृत्तिरिति भाव इत्या
हुर्नवीनाः । तन्न । न त्को सेडिति सूत्रे भाष्येऽनुक्तेः । यद्यपि तस्मादित्यादिना वदुक्तं तत्तन्न दूषितं । राम:
विभाषोपयमने उद्धुयधान्ह्वादिकमितोरन्यतरस्यामिति विकल्पद्वयमध्यपठितानामपि स्यादेवा ३९

रित्त्वे ल्मादीनां न भिन्ना योपमनते उदुपचान्द्राबाद् कर्मणोरनन्तरस्यामिति विकल्पद्वयमपी
पक्षितानामभिप्रायः परेन द्रुल्मादीनामिवनित्यत्वं न स्यात्। किंतु अव्यवहितपूर्ववर्तिनमपत्ति
त्तिष्ठायामित्यस्येव स्यात्। वस्तुतस्तु अनुवृत्त्यननुवृत्ती व्या[illegible] ख्यानगम्ये। तथा च स्वरितेनाधि
कार इति सूत्रमपि मा स्तु। कृतेपि सूत्रे स्वरितत्वज्ञानास्यात्तु नासिक इव व्याख्याने कसाध्यात्वा
ध्ये त्। एवं च विकल्पद्वयमपि पठितानां नित्यत्वनियमेमानाभावः। न च पू.उ.क्तावेति सूत्रस्थं भाष्य
मानमिति वाच्यं। तस्यान्यपरत्वात्। तथाहि भाष्ये विकल्पद्वयमध्यपठिते नापि पू.उ.क्तावेत्यने
नत्क्वानिषेधे कित्वं विकल्प्यते। तथा च कित्वाभावे पवित्वा पवित्त इति कित्वपक्षे त्युकः कित्तीणनि
षेधात् पूत्वा पूत इति रूपद्वयं मा च पवित्वे[illegible]धायकं पू.उ.क्त्वेति सूत्रेन कर्तव्यमिति सिद्धान्तयित्वा भार
द्विकल्प द्वाजीयाः पठंतिति निसमकित्वमिडाद्योः क्वाग्रहणमुत्तरार्थं [illegible] विभाषामध्येवचपेविधयस्तो
नित्यानवंतीति भारद्वाजमतेनुपन्यस्यतन्यते पू.उ.क्त्वेति सूत्रं कर्तव्यमिति गौरवेणानादरः सूचितः।
एवं चानुवृत्तिरननुवृत्तिश्चाननुवृत्ती व्याख्यानमविवेकेनैवेति दिक्॥ ॥॥इति हल्संधिः॥ ॥ शर्परे विसर्जनी
यः। अत्र यद्यप्यत्र व्यंतनमो राजिसमः क्वाविस्रौ नं। यत्तु विसर्जनीयस्य सो शर्परे इति न सूत्रं कृतं।

वाशूरीत्यत्र तेन सर्वविकल्पोसिद्धावपि कुप्वोरित्यत्र शर्परे त्यनुवृत्त्या तयोः शर्परे अप्रवृत्तावपि कुप्वोरिति सूत्रे चाद्विसर्गत्याभावनापत्तेरित्याहुर्नवीनाः। तन्न। नशर्परे इत्यस्य समस्तत्वे तत्वाद्विसर्जनीयस्य सोनकुप्वोरिति व्याख्यानेनैव सिद्धेः। यद्वा कुप्वोरितिपरं यत्कुत्वं विसर्जनीयस्य सोनेत्यनुवर्त्यत एवं व्याख्येयं। ततः कुप्वोरेवेत्यत्र वा शरीत्यतो वाग्रहणमनुवर्त्यते कः यो वा भवत इति व्याख्येयं। एवं चच कारोपि भाष्यस्तु। सोपदादौ। यत्तु अन्यस्यासंभवादिति मनोरमा प्रतीकमुपादाय अयं भावः अपदाइत्येव कुप्वोरित्यनुवर्त्य यस्मिन्विधिरिति परिभाषया कुपुवर्गादौ अपदाइत्यर्थे न सिद्धे स्यादिग्रहणमपदस्य वादिरित्यर्थलाभार्थं तेन रः काम्यतीति विग्रहे सुबुत्पत्तेः पूर्वं समासे पुरः के तोस्या दौ न सत्वं। आदिग्रहणसामर्थ्येन तत्कर्थ्याव धारणेन च पदत्वयोग्यमात्रिपदिकानवयवस्यैव ग्रहणादित्याहुर्नवीनाः। तन्न। कुप्वोरित्यस्यापदाइत्यस्य वा विशेषणत्वे समन्यतान्विशेषणाभावेनार्वणस्त्रसावित्यादाविव परिभाषाप्रवृत्त्या वादिग्रहणस्य सार्थक्येन सामर्थ्याभावात्। नव येविभाषेत्यत्र अविष्णुधातुं तु वाभित्यत्रैव समुदायास्तन्तु ग्राकरोपि यथा रामः
परिभाषाप्रवृत्तिस्तथात्रापि न भविष्यतीति वाच्यं। आद्येकारस्योच्चारणार्थत्वेन लूल्वाव्याघातात्। ८०

:प्वो९

द्वितीये त्वस्याऽलघ्वर्थत्वात्। प्रकृते तु कुर्वोरिति समुदायात् सप्तमी स च नालघ्वर्थ इति वैषम्यात्। अहं त्वोरूप
जीयो पञ्जीकभावेनान्वयात् तत्समुच्चयबोधकचकारासंगतेश्च। तस्यादन्यस्य सेभवेयथि वृत्तौ यथाग
णनात्तत्र सत्वं नेष्टमिति सेवति छ्मर्षः। इदुदुपधस्य चाप्रत्ययस्य॥ यत्तु अप्रत्ययोपः विसर्ग इति
मनोरमाप्रतीकमुपादाय विसर्गस्यान्यलक्ष्णपरे फ इति प्रत्ययस्य लक्ष्यान्यलघ्वर्थत्वेन तदु
त्तिदेशाप्रवृत्तिरिति प्रत्ययरूपो विसर्गो दुर्लभः स्यष्टाच यथोरीति भोभगो इति सूत्रे भाष्ये। किंचै
वं सामानाधिकरण्येस्तोरिति वक्तव्योऽप्रत्ययग्रहणं व्यर्थं स्यात्। किंचैवं नित्यं समासे इति सूत्रे
नुत्तरपदस्थस्येत्यस्य वैयर्थ्यं। परमसर्पिः कुंडिकेत्यादावनेन षत्वस्य दुर्वारत्वात्। किंचैवं नित्यं
समासइति सूत्रस्य भाष्यासंगतिः। तथा हि अ[illegible]यापत्वं प्राप्ति पदि केसर्पिराददित्तत्तो नित्ये प्रा
तेदम् सोः सामर्थ्ये इति विभाषारभ्यते इति हि तत्रोक्तं। प्रत्ययलपधीव्याधिकरणात्व भित्य स्येत्यस्य वैतुध्यु
नतिप [illegible] द्वेपि निस षत्वप्राप्तेरथाप्युत्तनिमित्यादेरसंगतिस्यष्टैवात्र भाष्येत्र पदेतिपपर्थे तेन
सर्पिषाप्रजुर्वेत्यादौ षत्वसिद्धये सुत्तानिपदग्रवनत्व माविति सचिंत्यं। तस्मादत्र प्रत्ययपदे तत्संब

घिपरा। प्रत्ययसंबंधिभिन्नस्यविसर्गस्येसमर्थउचितः। अत एव कविभिः ह्रतमित्यादौ न दोषः। नि
त्यं। व्याख्याद्दर्शनानुसारेणोतद्वंद्वयसत्वात्। तत्तत्प्रत्ययनपरत्वं ह्यतिनामीमर्दर्तव्येत्यातुर्नेवीतेः समासे इ
ति सूत्रस्यानुत्तरपदस्थलस्यकस्कादिषु सपिष्कुंडिकाशब्दपाठस्य चैतदर्थज्ञापकत्वे वोचितेत्
ति चेत्सत्यं। व्याख्यादर्शनानुसारेणोतद्वंद्वयसत्वात्। तत्प्रत्ययनपरत्वं ह्यतिनात्तीवादर्तव्येत्यातुर्न
वीनाः। तन्नारायणापेत्यादौ सुपत्वस्य स्यान्यलितया वृत्तित्वे सति स्यान्यलुप्तत्वरूपालुप्धर्मत्वाभा
वेनानल्विधाविति निषेधाप्रवृत्त्या स्यानिवद्भावसत्ति देशाप्रवृत्ति वस्तुत्वेयत्व स्यापि तादृशालुप्धर्मत्वा
भावेनानल्विधाविति निषेधाप्रवृत्त्यावत्ति देशप्रवृत्तौ बाधकाभावात्। न च डेःर्य इति यदि घौ विशिष्टस्य
स्थानित्वं विसर्गप्रत्ति तु रेफमात्रस्येति वैषम्यमिति वाच्यं। तत्स्येट्ईटत्त्वत्रे वानाश्रयणेनाकिंचित्क
रत्वात्। अन्यथात्रैव रेफस्य लदीत्याभावेनपदत्वाप्रवृत्तौ विसर्गो न स्यादिति सर्वोपपूर्वं एवस्या
त्। अमद्रित्यातुसुप्त्स्यालुप्धर्मत्वाभावेनैवदोषाभावात्। त्वयातुप्रत्ययपेति ज्ञापकमाश्रयणीयमि रम.
ति गौरवं। स्पष्टं चेदं शाति भौ भगो इति सूत्रे भाष्ये। इत्युक्तिस्तु छात्रप्रत्तारणमात्रं। नहि तेन प्रत्ययत्व ४१

स्याल्लघुधर्मत्वं लभ्यते। तथा हि। तत्र हि अग्रहणाभावे छेदः सुपपः सु इत्यत्र विसर्गस्य स्थानिवत्वे
न रुत्वाघत्वप्राप्तिमाशंक्य रोरीत्यतो रग्रहणमनुवर्त्य रो यो रेफस्तस्य यत्वमित्याख्या [redacted]
नेतालिखितत्वात्स्थानिवद्भावाभावे रुत्वाभावाघत्वाप्रवृत्तावग्रहणमनुत्तरार्थमिति सिद्धं तितान
हि अनेन भाष्येण प्रत्ययत्वमलघुधर्म इति भवदुक्तेर्लभ्यते। एवं च प्रत्ययरूपो विसर्गः सुलभ इति
मनोरमोक्तेः सामञ्जस्यमेव। यद्यपि किंचेत्यादि व्यर्थं स्यात् तदुक्तं तत्तदपि न। सुरासु छद्द इवद्धि सुष्ठु द्वाद
पि आचष्टे इत्यर्थे प्रत्यये रिलोपे द्विष्यरोतीत्यादि सिध्यर्थं नप्रत्ययग्रहणस्य सार्थक्यात्। अन्य
था सोरिति प्रतिषेधं स्यात्। यद्यपि किंचेत्यादिस्य षेवेत्युक्तं। तदपि न। नित्यं समासेनुत्तरपदस्थ
स्येति सूत्रस्य भाष्ये परमसर्पिः कुंडिके सत्यानेन षत्वाभावे पासुसोः सामर्थ्ये इत्यनेन षत्वविक
ल्पमाशंक्य त्रेधा समाहितं। व्यपेक्षाविरहात्। यद्विविनिगमनाविरहादि सुसोः सामर्थ्ये इत्य
त्रोभयपद्विधे सामर्थ्यं गृह्यते तर्हि अपग्रहणे पस्मात्सविहितस्तदादेस्तदंतस्य ग्रहणमिति लि
वोहः। न चैवं परमसर्पिष्करोतीत्यत्र षत्वविकल्पो न स्यादिति वाच्यं। अनुत्तरपदस्थस्येत्यनेन

सुसोर्विषये प्रत्ययग्रहणपरिभाषानुपस्थानस्य ज्ञापितत्वात् । यद्वा अस्तूत्पत्तिपक्षे परिभाषानुप
स्थानात् परमसर्पिष्क इत्यादावपि षत्वविकल्पसिद्धेः । एवं चास्तूत्पन्ने प्रातिपदिकमिति नाक्षं संग
तमेवेति अप्रत्ययस्येत्यस्य सामानाधिकरण्येनान्वयेपि न काचिदनुपपत्तिः । तत्रस्त्वस्य पुंमहसोः
प्रतिषेध इति वार्तिके तन्द्राश्चेचा चतुष्पादुन्मोदजित्यादिनिर्देशा अपि सामानाधिकरण्येनान्व
येवाजेन्यथा चतेरुरन्निति सुत्यादितत्वेन प्रत्ययावयवत्वात् षत्वं न स्यात् । न चास्तूत्पत्तिपक्षे निर्वाहः ।
भाष्ये यजुषेत्यादिसिध्यर्थं षत्वविधौ उत्पत्तिपक्षस्यैव स्वीकारात् । किंच सामानाधिकरण्येनान्व
येपक्षद्वयेपि रूपसिद्धिः । वैयधिकरण्ये तु अगतिकस्य उत्पत्तिपक्षो न रवेति । एवं च तुष्कपालः । चतु
ष्कं चाशदित्यादेः पः प्रयोगाः पक्षद्वयेपि साधवः । न चैवं पेचुःकाष्टैः । सर्पिः पाकः । कविभिः हृतमित्या
दावित्युदुपधस्येति नित्यषत्वापत्तिः । इसुसोः सामर्थ्ये इति विशेषशास्त्रपर्यालोचनया सामान्यशास्त्र
स्य सुसन्निन्ने उदुपधपरत्वात् । मानं चात्र कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठः ॥ अन्यथा तेनैव सि
द्धे किं तेनापवादेनिति संसमासेति सूत्रे नियमार्थं । इसुसोः स्येन्नित्यं षत्वं तर्हि अनुत्तरपदस्थस्य समासे

एवापदस्य इदुदुपधस्येति प्राप्तं इसुसोरित्यनेन बाधितं तत्र हि पिपठिषोः सकारस्याहच र्येणात्महल्लत्वपयोः
विग्रहेणान्निवारितं तस्य द्वैवदत्त हेन्तहे तत्प्रायेन न नित्यमुभूलप्रवर्त्तकं। एवं च सकलसंमत त्वान्दोष्या
विरोधात्सामानाधिकरण्यपक्ष एव समीचीन इति मन्यन्ते इति दिक्। अन्त्योपधाग्रहणं व्यर्थमि
दुदुभ्यां मन्त्रत्ययस्येत्येव वक्तुमुचितं। अत एव हयवरट् सूत्रे योगवाहानामविशेषेण पाठे प्रयोज
नकथनावसरे विसर्गस्याल्त्वादुपधासंज्ञायामिदुदुपधस्येति षत्वसिद्धिमुक्त्वा नैतदस्ति उपधा
भाष्ये ८ ग्रहणं न करिष्यते इस्सुसोर्द्विस्त्रिश्चतुरिति हलोर्थ। अत्र द्विस्त्रिश्चतुरिति न कर्तव्यं इदुद्भ्यामित्य
नुवृत्तौ वेदुद्भ्यां मुत्तरस्य कृत्वोर्थे वर्त्तमानस्य पदस्य यो विसर्जनीय स्तस्य षत्वमिति व्याख्यानेन पं
च कृत्वः करोतीत्यादि व्यावृत्तिसिद्धेः। स्यपंचेदं भाष्य। यत्तु भाष्ये कृत्वोर्थ इति न्यासे कृत्वो
र्थ इत्यस्यासिद्धत्वेन चतुःशब्दे इदुदुपधस्येति नित्यषत्वापत्तेः प्रकरणोप्रकरणमसिद्धमिति पदा
६२ स्यपसर्गादसमासेपीति सूत्रे केचिदपूर्वपदादिति सूत्रे भाष्ये च दूषित एवाउपसर्गादिति सूत्रे चो
पापादपि ष्वेते किंच पूर्वत्रेति सूत्रेप्रेति पूर्वशब्देनेन प्रकरणग्रहणे व्यवहितप्रकरण एव त्रिपाद्यासि

तर्कचंद्रिका उद्देश्यानुसंपत्त्यापत्त्या ध्यायेषा किंचास्याधिकारत्वाभ्युपगमे तस्त्वमुपस्थित्याप्रतियोगमसिद्धत्वं दुर्वारमिति न्य
न्यत्रविस्तरः इत्यनेन दूषयांचक्रुर्नवीनाः शार्ङ्गं दुग्धो स्वरेति त्वत्तउपसर्गादिसमासेपीति सूत्रे प्रकरणेप्र
४३ करणमसिद्धमिति पक्षस्य दूषितत्वाभावात् तथाहि। माष्यपूर्वपदादिति सूत्रे पक्षद्वयमुपन्यस्तं वि
43 धिपक्षः नियमपक्षश्च। तत्र संज्ञायांनियमवचनंतु स्यादिना णगयनादिष्वइत्यंतेन नियमपक्षः उ
पन्यस्तः। नैव वा पुनरत्र णत्वं प्राप्नोतीत्यादिना समासग्रहणमनर्थकं स्यादित्यंतेन विधिपक्ष उपन्य
स्तः। तत्र विधिपक्षे त्यादौ निमित्तनिमित्तिनोरेकपदस्थत्वेन प्राप्तणत्वनिवृत्त्यर्थं निमित्तवत्पदभिन्न
पदस्थत्वाभावरूपाख्यं उपदत्वाभावार्थं स॰ यमानामे+मानपदस्य कर्तव्यत्वेन गौरवात् अप्रकारेणो
पसर्गादसमासेपीति सूत्रे, विशेषेणोपसर्गणत्वे वक्ष्यामि। समासे नियमान्न प्राप्नोति। असिद्ध
मुपसर्गणत्वं तस्यासिद्धत्वान्नियमो न भविष्यति। एवं तर्हि सिद्धे सति यदसमासेपि ग्रहणं करोति तत्
ज्ञापयत्याचार्यः न योगे योगः सिद्धः। किं तर्हि प्रकरणमसिद्धमित्यंतेन समासग्रहणस्याकर्तव्यत्वेन ला
घवान्नियमपक्षः स्वीकृतः। केयटेन तु समासे नियमान्न प्राप्नोतीति प्रतीकमुपादाय यपदादर्वपदा प्रम.
त्संज्ञायामग इति सूत्रे नियमार्थमिति पक्षः तदेतदुच्यते समासपदे हि समाने निमित्तनिमित्तिनोर्भी ४३

वासिद्धत्वं निषत्स्यते। पक्षान्तु समानग्रहणात्समानमेव पञ्चमीसंपदं तद्दाश्रीयते न दा पूर्वपदादित्य
स्य विधेयार्थत्वादसमासे विग्रहेणस्य ज्ञापकत्वानुपपत्तिः। न्यायात्तु प्रकरणोप्रकरणस्यासिद्धत्वं स्य
वस्याप्यतोऽप्रकरणस्यार्थवत्त्वात्तदन्तर्गतानां योगानामानर्थक्याद्योगे योगस्यासिद्धत्वा योगान्त
। पूर्वत्रासिद्धमिति सूत्रे भाष्येपि पदस्य कृत्वोऽर्थे वर्तमानयो विसर्जनीयाद्युत्पत्ते न हि त्रिपाद्यां तु ये ठंतां
प्रत्याख्यातं। व्याख्यातं च कैयटेन। ननु पूर्वत्रासिद्धमिति विकल्पस्यासिद्धत्वाच्चतुः करोतीति निषेधत्व
प्रसङ्गः। नैष दोषः। प्रकरणोप्रकरणमसिद्धं न तु योगे योग इत्युक्तत्वात्। अत एव इदुदुपधस्य कृत्वोर्थ
वृत्तेः नाप्राप्ते निषेधत्वेऽस्य[illegible]रंभादस्यापवादत्वमिति अपवादो वचनप्रामाण्यात् असिद्धो न भवतीति एवं च
सूत्रे यपचीलोचनयाप्रकरणोत्पादिरोत्पादि त्रिपाद्यां तु ग्रहणमत्यास्यानमेव भाष्याभिप्रेतमिति निश्चीय
ते। किं च भाष्ये कृत्वोऽर्थ इति न्यासे यद्दूषणमभिधानं तन्मन्दबुद्धेस्तु च इति न्यासेपि समाने समाधिरपि उभ
योस्तुल्य इति दृष्टैव भाष्यदूषणमिति विशः। किं च प्रकरणे इति उपसर्गादिति सूत्रे दूषितमेवेति कथं नतु
साहसमात्रं। दूषणं पूर्वशाकपार्थिवादिखंडने एव दूषितपदाभिधानं न तु शिष्यबुद्धिवैचित्र्यार्थं पक्षान्तराभि
धाने इति दिक्। यदपि किंचेत्यादि तदपि नापूर्वशब्देनाव्यवहितप्रकरणव[illegible]वल्मते सूत्र[illegible]स्यापि ग्रह

तर्कचंद्रिका। ४४

णापत्त्योरुभयोस्तुल्यत्वात् । तदर्थं त्रैलोक्यस्य प्रकरणाद्वोपस्थित्या प्रतियोगमुपस्थितसंभावेन द्विजोपस्थाप्यमा
वात् । एवं च भाष्यविरुद्धप्रतिपादनमनुचितमित्तिदिक् ॥ ॥ इति विसर्गसंधिः ॥ ॥ ससजुषो रुः । पदांतस्य
ससजुषशब्दांतस्य रुः स्यादिति व्याख्याने तु अपदे शिवस्वादावनाश्रयणमिति लाघवं । पदांतस्य प्रसक्तविधा
तिप्रतीकमुपादायात एव पदेन विधिरिति सूत्रभाष्ये प्रसक्तविधिनिषेधेरन्निमित्तसादीगस्य माणप्रातिप
दिकेनापि तदंतप्रतिपादनेनस्वसामर्थ्यमस्मत्सुदाहृतं च संगच्छते । अस्य समासप्रत्ययविधाविति नि
षेधानुवादकत्वाय एवं सुकृतां ज्ञापकत्वस्य ज्ञापकं सदर्थोऽस्तीति सूत्रभाष्यपदार्थोदितनिरिंसत्र तदंतविधि
नैवसिद्धे कितेनातात्प्रत्ययविधौ प्रतिषेधस्यैव ज्ञापकमितिवक्तुमशक्यं । अतएव तदंतविधिसूत्रभाष्ये समासप्र
त्यादिनिषेधवदस्यन कथनमिति वोध्यमिति नवीनैरुक्तं तन्न विशेषणविशेष्ययोर्यथेष्टत्वादितिभाष्यादे
वसमासप्रत्ययविधाविस्यादीनामसिद्धत्वेन तत्रज्ञापकोपन्यासस्य व्यर्थत्वात् । अन्यथाकानि पुनरस्य यो
गस्य प्रयोजनानीत्यारभ्य भाष्यमसंगतं स्यात् । तथाहि दित्यग्रहणं च प्रयोजनं दितेरपत्यं दैत्यः । दित्सदित्या
दित्येति अदितिग्रहणं न कर्तव्यं भवति । परमादित्सशब्दात्तु अनभिधानान्न भवति । धर्मान्नञः प्रयोजनं ।
नां अधर्मं चरत्याधर्मिकः । अधर्माच्चेति न वक्तव्यं भवति । सोम्याण्ग्रहणं च प्रयोजनं । आजकरोणासैंहिकयो राम:
णः । तस्य च यौणः । तथा रथसीताहलेभ्यो यद्विधौ प्रयोजनं रथ्यः परमरथ्यः सीत्यः परमसीत्यः हल्यः परमहल्यो ४४

स्यादिसूत्रोदाहरणेषु ज्ञापकसिद्धस्य मामेत्यादीनां प्रवृत्त्याभावाच्चासंगतिस्स्यादेव। तस्मात्त्वमासमस्तस्य यावि
धौ प्रतिषेधः। उगिदचां ग्रहणवर्ज्जं ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति। व्यपदेशिवद्भावो प्रातिपदि
केनेति वाक्यानां विशेषणविशेष्यभावसिद्धार्थकथनं तु तत्र ज्ञापकापेक्षा। एवं च सपूर्वा चेति सूत्रे म
ह्वेति महल्लाघवं। सूत्रान्तादृकुद्ग्रानादौ उ सूत्रान्तग्रहणं तु केवलात्सूत्रस्य योऽप्राप्तिव्यावृत्त्यर्थं कर्तव्यमेव। अ
न्त एव स्वमतमिय मदेशोचितत्वो दोन तदन्तविधिः। शोभनाः सुभगस्थूले त्यादौ तदन्तविधिरिति विषयविभागः सं
गच्छते। अनुपसर्जनादिति ज्ञापकानुसरणके शोपिनेति दिक्। ननु व्यपदेशिवद्भावो प्रातिपदिकेनेत्यस्याकारे
पे च महत्या दाववपि व्यपदेशिवद्भावेनासंख्यादेरिति निषेधापत्तिरिति चेन्न। असंख्यादेरिति ग्रहणसामर्थ्या
न्मुख्यस्यैव ग्रहणात्। भो भगो अघो अपूर्वस्य योऽशि। ननु सान्तानुकरणे विभाषा भवदित्यादिवार्त्तिकनिष्प
न्नानां ग्रहणं न स्यादत आह। सान्तं वेति। कृतेतरूपानुकरणमिति अर्थः इति नवीनाः। तत्र तुल्यार्थत्वाभावात्तुल्या
र्थास्तु विकल्पेरन्निति सूत्रविरोधः। समं तु प्रतिभाति। इति कारहरदत्तादिमते वार्त्तिकोक्तगणावत् सान्तानुक
रणे भाष्यस्वरसरीत्या तु सान्तमेवेति विवेकः। यत्तु अलोंऽसस्मति। न च भगो राजसे इत्यादौ रोरिति लोपे एकदे
शविकृतन्यायेन भोः शब्दादेः सस्योकारस्य यत्वापत्तिरिति वाच्यं तेषामभिधाने एवं रोरपूर्वस्य रोरिति व्याख्या

तेनादेशो वो ध्यः। अत्र पदद्वैधो शङ्कोत्तरं द्वेषध्याः सो त्रोलु कुवो ध्यः इति न वा नैरुक्तात्तन्नः भगो राजसे से
रुत्वादावेकदेशविकृतन्यायेन भगोः शङ्कत्वेपि सोत्तानुकृतभगोः शङ्काभावेन यत्वानापत्तेः। तथा च यथा श्रु
तैव मनोरमायाः साधुत्वेन क्वाव्याख्यानस्याप्यर्थत्वाच्च। यत्तु अवधेयमिति। पदेरग्रहो भिदिदार्थ इति सूत्रे रु
दः स्थानित्वे न निर्देश इति तत्रानलाश्रयणं प्रकृते तु विसर्गे रेफस्यैव स्थानित्वाद्वेषम्य अनल्विधाविति स्य
स्थान्यलवृत्ति धर्माश्रये स्थानि संबधि अल्वृत्ति धर्माश्रये चनेत्यर्थः। तत्र स्थान्यलेफवृत्ति रुत्वं स्थानि
वत्वेन दुर्लभमनल्विधित्वात् तस्यषष्ठे वेदे प्रकृतसूत्रे भाष्ये इत्युच्यते तदा पः पस्विसत्र पत्ववारणाया शाति
तत्रहि रोः सुपीति विसर्गः। नियमशास्त्राणां च विधिमुखेनैव प्रवृत्तिरिति तत्र रुविशिष्टः स्थानीति तद्वृत्ति
रुत्वस्य स्थानिवत्वेन लाभः सुकरः। यदि तु रो सुपीत्यत्रापि रइत्यनुवर्त्य रोरेफस्यैवेति न विसर्गस्तदा शास्त्र
हणमुत्तरार्थस्य ष्टार्थमिहैव तेन लाभः हतमिसधेयमित्यादि न वा नैरुक्तात्तन्नाः अनल्विधावित्यस्य
स्थान्यलवृत्ति धर्माश्रये इति व्याख्याने पचतीत्यादौ स्थान्यलवृत्ति अत्वं च यत्वे स्थान्यलेफवृत्तिमि[illegible]वा इति रुत्वे
नल्विधाविति निषेधापत्त्या दुर्लभं तथा च ऊं चेत्यादौ नामप्रवृत्त्यापत्तेः। न चा रुभसाम र्थ्यात् इत्येतो न
उपंतर [illegible] तत्र [illegible]रितार्थत्वात्। स्थानिवद्भावेन रुत्वापत्तापत्तेः इति व्याख्येयमनोर

न्यपेव। १

रम्मादिसकलग्रन्थविरोधाद्गौरवात्प्रमाणाभावाच्च न च भाष्येत्ताहशार्थे मानो तस्यान्याभिप्रायकत्वा
त्। तथा हि। अग्रहणमनर्थकं मन्त्राभावात्। न हि अन्यत्र रुरस्ति अन्यद्धतः औ। ननु चायमस्ति छेदः सु
पपः सु। किं पुनः कारणं सुकारपररूपो दाहि यत्तेन पुनरयं दृश्यतेऽ[illegible] दृश्यतेऽत्रेति। अस्ति तत्र विशेषः वि
सर्जनीयेऽकृते न भविष्यति। इहापि तर्हि विसर्जनीये कृते न भविष्यति छेदः सुपपः स्विति। स्थानिवद्भावान्न भ
विष्यति। ननु चेहापि स्थानिवद्भावात्प्राप्नोति वृक्षस्तत्र प्लक्षस्तत्रेति अनल्विधौ स्थानिवद्भावः अथायमल्वि
धि स्यात्तशाक्यमरग्रहणमनवकं। वा॰ ग॰। शा॰ कं॰। अल्विधिस्तर्हि भविष्यति। कथमिदमस्तिरोरीति। ततो वस्या
मिखरवसानयोर्विसर्जनीयः ततो रो। सुपि विसर्जनीयः रुइत्येव। उत्तरार्थं तर्हि अग्रहणं कर्तव्यं। हसि
अशिवथास्यात्। इह मा भूत्। वृक्षवपतेरप्रसपः। वृक्षवृकरो[illegible]तीति भाष्यादनल्विधाविति स्तस्य स्थान
त्वान्नित्यादेशे स्थानिवद्भावो न भवतीत्यर्थोऽभिप्रेतः। एवं च खरवसानयोरिति विसर्जनीये न स्थानि
वद्भावः। रोः सुपीत्यनेन विहिते तु स्थानिवद्भावः। यदि तु तत्रापि रग्रहणमनुवर्तते तदा तस्याप्यल्विधि
त्वात्स्थानिवद्भावाभावः। परं तु अस्मिन्नर्थे प्रचेतारीत्यादौ दोषसद्भावात् ~~[illegible]~~ तहीसनेनास्वरसः स
चितः। तथा चानल्विधौ कर्तव्ये इति मूलोक्तमेव साधु। एवं चाग्रहणमिहार्थमपि र किं वा अग्रहणं

तर्कचंद्रिका। ४६ 46 भावे कार्यकालपक्षे परनिमित्तत्वाभावेन पतस्यांतरंगत्वाद्बहिरंगमपि भाषणादिविसर्जनीयस्यासिद्ध
त्वे घत्वं स्यात् यदि तु हलोनंतराः संयोग इत्यादिनिर्देशादत्र पत्वं निवार्यते तर्हि उत्तरार्थमेवाग्रहणं
एवं च स्यान्यत्वं वृत्तिधर्मोऽप्यस्थान्यार्थसंबंधिधर्मोऽप्येवं नेसर्थ इति व्याख्यानं फलाभावादयुक्त
मिति दिक् ॥ छ ॥ श्री ॥ ॥ इति श्रीमन्मौनिकुलतिलकायमानगोवर्द्धनभट्टात्मजरघुनाथभट्टसुत
श्रीकृष्णभट्टविरचितायां तर्कचंद्रिकायां पंचसंधिप्रकरणं समाप्तिमगमत् ॥ ॥ अर्थवदधातुरप्रत्य
यः प्रातिपदिकं ॥ अत्र तार्किकाः अर्थवत्वं वृत्तिमत्वं वृत्तिश्च शक्तिर्लक्षणा वा शक्तिश्चेश्वरेच्छा पदा
र्थांतरे वा लक्षणा च शक्यसंबंधः तथा च प्रत्ययांतपर्युदासो न कर्तव्यः वृत्तिमत्वाद्वृत्तिसिद्धेः लक्षणादि वादेवत ७
शा५ ते इति संप्रत्ययस्तत्रेवि ध्यर्थः अर्थवद्ग्रहणानुवृत्तेः शास्त्रंगमित्याद्यनर्थकमासे पि संज्ञासिद्धिरि
त्याद्याहुः अत्र शाब्दिकाः अर्थवत्वं वृत्तिमत्वं वृत्तिश्च नेश्वरेच्छा विनिगमनाविरहेण ज्ञानेच्छयोरपि
तदापत्त्या गौरवापत्तेः पदार्थांतरत्वेपि तथात्वे लक्षणा च न शक्यसंबंधरूपा गंगायां घोष इत्यादौ
लक्षणानापत्तेः तस्माद्द्विधाणां स्वविषयेषु नादियोग्यता यथा आनादिरर्थे शब्दानां संबंधो यो रा॥
ग्यतां वेत्यादि युक्तोत्पा बोधकत्वं शक्तिः एवं च गंगायां घोष इत्यादौ गंगापदस्यापि तीरबोधकत्वे ४६

नबोधकत्वरूपशक्तिसत्वात् । लक्षणारूपवृत्तेरस्वीकाराच्चाद्यवृत्ति यथा चार्थधीजनकज्ञानविषयप्र
त्ययस्य समर्थवत्त्वं पर्यवसन्नं तादृशार्थवत्त्वे प्रत्ययान्तेवाक्ये प्रसक्तीति तद्व्यावृत्त्यर्थं प्रत्ययोत्तरपर्युदासः स
मासग्रहणस्य नियमार्थत्वं च वाच्यं । किं च तार्किकरीत्या समासग्रहणस्यानियमार्थत्वाभावे मूलके नो
५६ पदेशामित्यादौ तदभिहितो गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया कृदन्तत्वाद्धातिप्रातिपदिकत्वापत्तिः । न
नु स्वरूपसती बोधकत्वशक्तिः कारणं ज्ञाता वा नाद्यः अगृहीतशक्तिकस्यापि बोधापत्तेः । नान्त्यः । अन्यो
न्याश्रयापत्तेः । तथाहि बोधोत्तरं शक्तिज्ञानं शक्तिज्ञानोत्तरं बोध इति चेन्न । पथा सैनिक र्यादिसहितस्यै
व क्रियादेः कारणत्वात् । तथा तात्पर्यग्रहसहितस्यैव घटादेः कारणत्वात् । एवं चागृहीतशक्तिकस्य तात्पर्यग्रह
काभिकारणाभावेनाप्रसक्तेर्दोषाभावात् । द्वितीयपक्षेपि न बोधोत्तरं शक्तिज्ञानं येनान्योन्याश्रयः स्यात्
। किं तु व्यवहारादिनेति दोषाभावात् । अन्यथेश्वरेच्छापदार्थोत्तरं वेति मतेपि दोषस्तद्वत्स्थः । तथाहि बो
धोत्तरमीश्वरेच्छाज्ञानं तदुत्तरं बोध इति । बोधकत्वं शक्तिरित्यभिप्रायेणैव वाक्यप्रसक्तौ तत्र बोधकत्व
रूपशक्तिसत्त्वात्प्रातिपदिकसंज्ञाव्यावृत्त्यर्थं प्रत्ययोत्तरपर्युदासः । अत एवार्थवद्ग्रहणमनुवर्त्य समा
सग्रहणस्य नियमार्थत्वं चाङ्गीकृतं भाष्यकारादिसकलग्रन्थकारैः । नचैवमेषवं ध्यास्तु तोपातिरवपुष्पक

न शेरवरः नम्रगत्त स्तोमस्तिस्त्वात्ः शशश्रृंगधनुर्धरइत्यादावर्थाभावेनार्थधीजनकज्ञानविषयशब्दत्व
रूपार्थवत्वाभावात्सेज्ञानापत्तिरितिवाच्यं शशादिकमतेशाब्दबोधेऽर्थस्य सत्तापाः कारणत्वस्याभावनिश्चय
स्यप्रतिबंधकत्वस्यचास्वीकारेण शशशृंगादिपदानामपिअर्थधीजनकत्वसत्वात् अन्यथानाहं रहस्यमिति
तिबाधनिश्चयेसतित्वं रहस्यतिरितिस्ताव कावाक्यास्तुखेत्वं चं डालइतिनिदावाक्यर्द्धः खंवचनस्यात् परंत्वस्मि
न्मतेनियमस्यपदिसंख्यात्वेनस्वार्थहानिः परार्थकल्पनाप्राप्तवाधश्चेति दोषत्रयमन्यादावेन च त्वपदस्या
ग्रहादर्थवत्वेनप्रादिंतिपुकत्वापत्तिः नचसमुदायशक्तिरेव पुवशक्तेः प्रतिबंधिकेति युक्तं अन्वेतोगच्छति
त्रात्तः काको देशोपनेत्यादिसमंगम्लेषस्यमंडपेपश्येत्यादियोगिकरूढेश्चो छेदापत्तेः तदर्थसमुदाय
शक्तिस्वशक्तत्ताव छेदकानुपूर्वीभंगजनिकावपवशक्तेः प्रतिबंधिकेति निष्क र्षोवाच्यः तथाचगोरवं
२१ ममत्वत्रकिंचित्स्यत्तिभात्तिनापूर्वोक्ताहतियुक्ताकिंतुकृत्तद्धितसमासेकशेषसनाद्यंताधातुरूपाः पंचवृत्तय
इतिपारिभाषिकवृत्तिमत्वमर्थवत्वं तथाचार्थवत्समासः कार्यएवं चकृत्तद्धितेति सुप्रत्यस्त्वग्रमधातुरत्रत्यप
ग्रहणं चनकर्तव्यमितिमहल्लाघवं नचपंचनावत्रिपइत्यादौ । प्रातिपदिक ... + पंचनावेत्यत्रवृत्ति

प्रातिपदिकमित्येव२

रामः ।
४७

७

सत्वात्प्रातिपदिकसंज्ञापत्तिरिति वाच्यं। प्राशस्त्यार्थकमतुपैकार्थीभावान्तर्गतत्वात्तेरेव तत्र ग्रहणात्तच्छ
न्ययापयान्यासेपि तस्याः दुर्वारत्वात्। पंचनावपि यद्यत्र पंचनावेत्यस्य वृत्तिसत्वेनार्थवत्वात्। नन्वेवं
पचतकीत्यादौ तद्धितवृत्तिसमुदायात्संज्ञापत्तिः। सत्यामपि संज्ञायां स्वाघुनतौ स्वमोर्नपुंसकादिति लुकि रू
पसिद्धेः। न चैतस्य नपुंसकत्वेन घनकेत्यादौ ह्रस्वो नपुंसक इति ह्रस्वापत्तिः। समन्तेऽधिकरतोच्चे सतेनेन तदभाव
क ५ स्यज्ञापनात्। पचतु सुपो धातुप्रातिपदिकयोरित्यत्र प्रातिपदि[क]ग्रहणादेव सिद्धे धातुग्रहणेन धात्वर्थविशेष्य
करूतौ तदभावज्ञापनात्। न च पचतिकल्पमित्यादौ संज्ञानापत्तिः। ज्ञापकस्य सजातीयत्वेन धात्वधिकारीयप्र
त्ययान्तधात्वर्थविशेष्यकवृत्तावेव तदभावस्य विव[]क्षितत्वात्। कल्पप्रत्ययस्तु न धात्वधिकारीय इति न त
त्राप्राप्तिः। न च मोक्तुं पाक इत्यत्र धात्वधिकारीयप्रत्ययोस्तीति चेत् किं ततः प्रत्ययार्थविशेष्यत्वेन धात्वर्थवि
शेष्यत्वाभावात् अप्रयत्नाद्वा। युक्तं चैतत् शास्त्रार्थवत्वात्। अन्यथा संख्यापाश्रति शदंतायाः कन्निति सूत्रभा
ष्ये नहि लोके केवलेन प्रत्ययेनार्थो गम्यते। केन तर्हि सप्रकृतिकेनेत्युक्त[]त्वात्तुल्यन्यायेन प्रकृतेरप्यर्थवत्वा
भावः। प्राग्विमतेः त्वदेत स्यन्तर्थे वार्थेनावि घचेद् इति लौकिकार्थाभावाद् अलौकिकार्थग्राह्यस्यादित्ति क्लेशः
। नन्वेवं [भावः। प्राग्विमतेः त्वदेत] वृत्तिरहितनिपातादेर्नो संज्ञा न स्यादिति चेन्न। अनुतत्ति वद्वेतत्त्वापि स

तर्के चंदिका स्त्वादिकस्य नासंभवेन वृत्तिमत्त्वात् पर्यायासेपि अनर्थकानां च कारेण संग्रहः इवमुबौ वुकू इति आदिनि
४८ र्देशेन वृत्तिरहितानामपि संज्ञा याः ज्ञापितत्वाद्वा एवं चानुमतिपक्षेन स्वीकार्यः यदि स्वाक्षिपते तर्हि जा
५४ ति व्यक्तिपक्ष एव [illegible] पक्षानुरोधाद्व्यवस्थापयत्नीया । नन्वेवं [illegible] तावृत्तिपद्‌त्वादौ [illegible] त्वावेतिहितिसत्ता
[illegible] पत्तिरिति चेन्न । काशरत्नार्थकनतुपाहेत्व [illegible] ग्रहणात् । ननु गवित्वस्य पमाहे
त्वादौ सर्वत्र प्रसक्तिपक्षे स्वीकारेण वृत्तिमत्त्वासाधितिपदिकसंज्ञापत्तिरिति चेन्न । इति पदस्य समभिव्याहारे
वृत्तिप्रयुक्तकार्याभावबोधनात् । भाष्यकारादिसकलग्रन्थकारैरनुक्तत्वाद्‌ प्रामाणिकमिति न मन्तव्यं । उप
न्याये ६ पप्रत्तिपत्तस्यार्थमुपायात्र व्यवस्थिता इत्तिनलाघवमस्यैव प्रमाणत्वात् । सरूपाणामेकशेष एक
विभक्तौ । अत्र रूपशब्दोऽवच्छेदकपरः विभक्तिः सारूप्येऽपलक्षणं । तथा च विभक्तित्वावच्छेदेन समा
नशक्यतावच्छेदकानां समानशक्ततावच्छेदकानां वैकशेषः । एवं चात्रैकग्रहणं अर्थविभक्तिग्रहणस्यैवो
पदालेणत्वसंभवात् । वक्रदंडश्च कुटिलदंडश्च त्यादौ समानशक्यतावच्छेदकानामभावः पादाभाषासु
त्वादौ समानशक्ततावच्छेदकानामिति विवेकः । नन्वकूपजातेः शक्यत्वाच्छेदकत्वापेक्षया कूपत्वादौ राम.
वावच्छेदकत्वे लाघवादितिसिद्धान्ते वक्रदंडश्च त्यादौ कथं समानावच्छेदकत्वमिति चेन्न । समानैव स्तुन्य ४८

वछेदकत्वमित्तिसमासेननिर्वाहात्तान्न्वेवंप्रमेयाभिधेयेस्यादावप्येकशेषापत्तिरितिचेन्नाविषयत्वा
न्नेकाद्दिष्ठपथेपिभेदस्वीकारात्तून चदेव देवइस्यादावपिप्रसंष्ट्यापत्तिः।हद्वद्वद्वत्यनुवर्त्यसाहित्येएवतत्प्र
वृत्तेः।४ अन्यथालेवोदरगजाननयोरिवपर्यायापत्तापत्तेः।४। मत्तावच्छेदकैकत्वेसतिशक्ततावच्छेदकभिन्न
पर्या त्वेहि यत्वेनस्यप्रवृत्तेसत्वात्ता [illegible] इहमाच्छेयद्वयपक्षाः उपन्यस्ताः तथा
हि।एष्वकुसर्वेभ्योविभक्तोपरतएकशेषः।१।एकवचनान्तानोवा।२।बहुतदुनोवा।३।। समुदायादेकवि
भक्तोवा।४।युगपदधिकरणवचनेवा।५।अनैमित्तिकोवेतिषट्पक्षाः।६।।तत्रानैमित्तिकपक्षातिरिक्ता
सर्वेपिदुष्टाः मध्यास्यात्तुएकवचनान्तान्नामेकशेषइतिपक्षोविभक्तिविशिष्टेइतिसत्वात्प्रातिपदिक
शेष४ त्वेसुपोधातुरितिलोपेदोषाभावः।एवंचैकंस्यादितिलमपिसार्थकं।एवंचविभक्त्यन्तानामितिपक्षोपि
प्राचांनिर्वाधएववा अत्रैवकारपकर्षोयं।। विभक्तित्वावच्छेदे नेतिव्याख्यानेनैवजननीवा
विपरिछिन्नत्वाचिनोः स्यादितिसिद्धेः।ननुएकवच्चास्यान्यतरस्यामितिसनेनपाक्षिकैकवन्द्भावविधाना
नर१ त्तज्ञापकात्इतरेतरद्वंद्वविषयेएवैकशेषविधानात्समाहारद्वंद्वविषयेअपवादाभावात्घटघटमिति

एवंचद्वंद्वापवादतापसंगछते३

तर्कचंद्रिका ४९ 49

द्वन्द्वापत्तिः। न चादिशब्दसमाहाराभाववत्सरूपाणामप्यनभिधानात्समाहारो नास्तीति वाच्यं दिक्शब्दसमा
हारस्य बाधवत्प्रसक्ते तदभावात् इति चेन्न। एवकारापकर्षेण सरूपाणामेकशेष एव वृत्तिर्नान्येति व्याख्या
नेन तद्व्यावृत्तिसिद्धेः। अत्रैकश्चैकश्चैकाविति सैकावाचकैकशब्दस्य न प्रयोगः एवं द्वंद्वोपि। अनभिधा
नात्वानुरव्यार्थस्यैव प्रतीतेः। तदर्थबोधकद्विशब्दस्य सत्वाच्च। एवं दशानां तु नैकशेषद्वंद्वौ। विंशत्यादिषु
तु न वस्त्येव। ननु तत्रैकशेषयोः को विशेषः तत्रैसैंधवपदवत्साहित्यानवच्छिन्नबोधः। एकशेषे तु पु
ष्पवंतशब्दवत्साहित्यावच्छिन्नपदार्थबोधः। एवं च उच्चारणं तंत्रेणावृत्त्या वेति विशेष इति केचिद्विदुः। तन्न
स्तौ। किंचावृत्त्याबोध इति पक्षे डमरुयत्रतात्पर्यं तदभावे वाकस्य पदस्यैकस्य प्रयोगादिति निर्णेतुमशक्यत्वे
न विनिगमनाविरहाद्दुर्णबोधस्यैव युक्तत्वात्। जातिपक्षेप्रवसरत्यानेसूत्रे भाष्यकारेण। न च सामा
न्ये जातस्याभावाद्वोलाश्चितेसामान्यात्स्यसापुत्वेन स्यादिति वाच्यं पदार्थविभाजकोपाधेरेव जातित्वस्वी
कारात्। किं वैरूपाधेः सामान्यत्वस्वीकारात् त्वस्य पदार्थान्तरतापत्तिः। एवं च सामान्येन सामान्यनि राम.
त्तिताकिं कस्य वाद इस्तुनि पुंस्त्विकत्वादनादेः। यदि तत्रैवाग्रहस्तव तर्हि तत्रैणनिर्वाहः। चूडा नन्वेदिष्टस्य पयो ४९

रनुवृत्त्या वाचाटच्चामरादावतिव्याप्त्यभावेपि त्वं चु सूत्रेणोरत्तिव्याप्तिस्तदवस्थानन्वा त्रपिताच्चिरस्य
सा २ रास्मृत्यापत्तलाभावः वयां पंपतेसिं चेन्नाच्चकारान्तत्वेनिर्देशे यकारस्य लोपो व्योरिति लोपेतस्यासिद्ध
त्वेन चकारस्यादित्वाभावात्। न विभक्तौ तुस्माः। यमुप्रत्ययस्योकारेणेतस्यानिसत्वज्ञापनात्किमो
दित्यादावित्संज्ञासिद्धिः। भाष्ये तु दित्करणेनैव तद्धितविभक्तावप्रवृत्तिः साधयित्वा दानीमित्यत्र यका
रनिर्देशेनाप्रवृत्तिः साधिता। तत्र दानीं चेति न्यासे लोपो व्योरिसस्यासिद्धत्वादेत्त्वाभावेन लोपोनेत्यु रसिद्धे
क्तं नवीनैः। तन्न। यमुप्रत्ययडुवांस्त्वोभावेनेत्संज्ञाभावसिद्धेस्तद्वैयर्थ्यान्न स्वयत्वात्। ममत्वत्र प्रतिमा
तिः। अत्र विभक्तिग्रहणं मास्तु। यमुप्रत्ययस्यादित्वेन दानीमित्यत्र यकारप्रश्लेषपरभाष्येणाचविभ
क्तिश्चेति विभक्तिसंज्ञके एव प्रवृत्तिस्वीकारात्। अत्रैव वार्थे देशप्रश्नोसितिवति स्वरितंकित्यादिनि
र्देशाज्ज्ञापकान्यनुसंधेयानि। वस्तुतस्तु दानीमित्यत्र यकारप्रश्लेषपरं भाष्यं चित्संज्ञफलाभावादेवे
त्संज्ञाभावसिद्धेः। न चेदम् शब्दे तदशब्दे च फलमस्तीति वाच्यं। इशादेशेन कृते विभक्तौ विवक्षितायामा
नत्वे च कृते तदभावात्। एकवचनं संबुद्धिः। यत्तु सुसंबुद्धिरित्युचितं। संबोधने चेत्यतः संबोधनइ

त्यनुवृत्तेः सप्तमीबहुवचनेन दोषः। संबुद्धावंगस्य गुण इति व्यवहारान्तर्गतैतस्य संज्ञा। तस्मात्पर यणा द्वावह
ष्टार्थत्वमेवं न्याय्यमिति बोध्यमित्याहुर्नवीनाः। शार्ङ्गदृशोसवरे। तन्न। संज्ञाविधौ प्रत्ययग्रहणे तदन्तविध्यभावे
न व्यवहारस्य हेतुत्वोपन्यासवैयर्थ्यात्। यणास्वकृन्निरुक्तदन्तविध्यभावे तस्य हेतुत्वानाश्रयणाच्च। वारिदेवद
त्तिष्ठतीत्यादौ तदन्तस्य संज्ञायामपि व्यवहारोपपत्तेश्च। न च वारीत्यस्यांगत्वेनास्तीति वाच्यं। न लुमतेत्यस्या
नित्यत्वेन हे वारे इतिवत्तत्संभवात्। तस्मादेकवचनग्रहणसामर्थ्यात्केवलस्य ग्रहणमिति तत्त्वं। भवान्दिशपिव
स्य मानग्राहेत्वांगाभावेन नादेशव्यवहारस्य त्यक्तत्वाच्च। एङ्ह्रस्वात्संबुद्धेः। एङ्ह्रस्वनिष्ठप्रकारतानिरूपित
विशेष्यताशालिनः संबुद्ध्याक्षिप्तस्यांगस्य हल्निष्ठविशेष्यतानिरूपितप्रकारताशालित्वेन व्याख्याने हे क
तैदितीत्यादौ नातिव्याप्तिः। एवं चोभयोरुपादानं सार्थकमिति दिक्। यत्तु संबुद्ध्याक्षिप्तस्येति। संबुद्धेः प्रत्य
यत्वेन यस्मात्स विहितस्तदादौ तस्योपस्थितिः। स चात्र योगपत्तपापेव मन्यते इति भावः। प्रत्ययेऽङ्गत्वमारोप
स्मात्स विहितः इत्यादिपरिभाषार्थः सांगस्येति सूत्रे भाष्ये स्पष्टं। अनुमानरूपाक्षेपस्तु नात्र फलाभावाच
था नुमीयमानरात्रिभोजनस्य पीनत्वोपपत्तिः फलं वत्तथेतस्त्रे तदनुमानेन संबुद्ध्युपपत्तिर्भवति। किं
च प्रत्ययस्योत्पत्तावेवापेक्षितेपि ज्ञानेतदपेक्षत्वाभावेन शाब्दे तदाक्षेपे मानाभावः। अत एवांगस्येति सू

न चाकृते
स्यादवस्थिता
२

एम.
५०

चैतस्यान्तेप्रत्ययइत्यधिकारः कार्यइतिपक्षेप्राकरोदित्यादावुपसर्गास्त्वर्वमडादित्यादित्याशंक्यप्रत्यय
ग्रहणेयस्मात्सविहितस्तदादेरितिपरिभाषोपस्थित्यासमाहितेभाष्येनत्वेगाक्षेपेतोतिदिक्।अंगस्येत्यस्या
र्थस्यहेतवश्राविति स्त्र्याद्वलित्यनुवर्ततेइत्युक्तेनवीनैःशब्देन्दुशेखरे।तन्न।भाष्येयथैवेत्यादिनाअंगस्येसस्यप्रयोजना
निप्रत्ययेइत्यनेनाविसिद्धानीत्युक्तेन तु ततैवाग्रहः।तस्यदोषदुष्टत्वात्।तथाहि अंगस्येत्यधिकृत्यका।निपुन
रंगाधिकारस्यप्रयोजनानिनिरुत्तदुरुत्तमित्यादौहलइतिदीर्घाभावः।तथा किंमित्याणपरूपामित्यापरत्वे त्यादौना पा
मिदीर्घोन।तथादधिसनोतीत्यादौदीर्घोन।ब्राह्मणाभिस्सेत्यादावैस्त्वन।प्राकरोदित्यादावुपसर्गात्स्त्वर्वमडादौ
न।युष्मत्तामेत्यादावाकल्पचहितावत्वमित्यादौ ततेश्च।कुमारीश्वामित्यारौनुट्न।प्राणाइत्यादौमुकून।कुमा
रीकापतीतिकुमारीकइत्यादौकेणइतिह्रस्वोन।दधियानामित्यादौदीर्घोनश्च श्लुइत्यादौतत्वेनेत्यादिप्रयोज
नान्युक्तानितानिसेत्तिप्रयोजनानिअर्थवद्ग्रहणेप्रत्ययग्रहणेसंग्राह्याणीतिसूत्रस्यार्थवत्प्रत्यय इति प्रकृत्यांग
कार्यस्यभाष्येप्राकोदित्यादौतुउपसर्गात्स्वर्वडादौप्राप्नुतः।किंतुप्रत्ययग्रहणेयस्मात्सतदादितदंतविज्ञानादि
त्युक्तेः।केयटेतुभित्तत्वेपरिहारोनोपपद्यतेवर्णग्रहणात्।अतएवाव्यापकत्वमस्यपरिहारस्येतिमत्वाहा।अथवे

तर्कचंद्रिका ५१ 51

तिा अत्तोभिस्स ऐस्मिसादिषु विविभक्तित्वान्भिसादीनां प्रत्ययेन संबंधो दुरूपपादः हल इति से प्रसारणाद्दीर्घ
त्वे च निरूक्तदुरुक्तमित्यादौ न यक्त्कृतं भवतीत्यनेनापस्तद्येपि दोषाभिधानान्निर्दुष्टंऽगाधिकारएवं ग्रन्थे पाति
तिसूचितं। अतएव सर्वैरपि ग्रन्थकारैरङ्गाधिकारेणोवप्रयोजनानि साधितानि।। न खलु कानिचिदप्रयोजना
न्यत्यथापि साधयितुं शक्यानीत्येवं परं नत्वङ्गाधिकारप्रत्याख्यानपरं येतन्मवदुक्तं संगच्छेत। स्यात्तदेतदेवमग्रहे
श्वेत्याकिं यत्तो मन्थं वद्ग्रहणमप्रत्ययग्रहणपरिभाषायो निर्वाह इति न्यायमतःपक्षः। न च भिन्नत्वे दोष इति वाच्यं
।न वर्णग्रहणेष्विति परिभाषाज्ञापकेनार्थवद्ग्रहणपरिभाषाया अनित्यत्वस्यैव ज्ञापनात्। एवं च न वर्णग्रहणेष्विति
परिभाषास्वीकारेण लाघवात्। एवं च यथाश्रुतमूलस्य व्याख्यासंभवे भेक्काव्याख्यानमनुचितमिति दिक्।।
यदपि अनुमानेन संभवतीत्युक्तं। तदपि न। अनुमानेऽनुमेयातिरिक्तफलवत्त्वनियमाभावात्। अस्तु वाग्यस्यो
पनीतभानमात्रे पः अङ्गस्य प्रसपक्षाप्यत्वात्प्रत्ययस्याङ्गव्याप्यत्वोत्क्त्वचिप्रत्ययेनाङ्गाक्षेपः त्क्वविधौ तस्म
त्ययाक्षेपः। यदपि किंच त्यादिमानाभाव इत्युक्तं तदपि न। प्रसपयस्याहतौ अङ्गापेक्षाभावात्। अपिच। अ
त्र पूर्वग्रहणं शक्यमकर्तुं पूर्वसवर्णग्रहणानुवृत्त्याज्ञांतेइत्यत्रैवैकदेशानुवृत्त्यावार्थसिद्धेः। न च द्विमात्रत्वाप रम०
त्तिः। पूर्वसवर्णदीर्घेण सिद्धेःमीत्यस्य व्यर्थतापत्तेः। न च कुमारी मित्यत्र त्रिमात्रप्लुतसंपादने चरितार्थत्वेन ५१

सामर्थ्याभावे पूर्वग्रहणं प्रकृतमात्रस्येत्यर्थकं अयवामीत्येकादेशोत्तरं सुपि चेत्यनेनात्र प्राप्तदीर्घत्वाग्रह
णमिति वाच्यं। प्रत्ययलक्षणमित्यादिनिर्देशेनोभयोरप्यभावबोधनात्। एतेन पूर्वस्य वर्णाउत्पन्नवृत्त्यैव सिद्धे पूर्व
ग्रहणं तु राममित्यादौ ह्रिमात्रत्ववारणायेति शब्देन्दुशेखरोक्तमपास्तं। अत्राजग्रहणानुवृत्तिरपि मास्तु। न च
विशिष्टस्य पूर्वत्वापत्तिः। अचि निमित्तमिति निर्देशेनैव सिद्धेः। अत एव काशिकायामचीति नानुवर्तितोय
स्मात्प्रत्ययविधिस्तदादि प्रत्यये गृ। अत्र प्रत्यये परे इत्यादिरंगमित्येव वक्तुमुचितं। प्रत्यये परतः संनिधाना
त्प्रत्ययनिरूपितप्रकृत्यादेरेवांगत्वमित्यनेन स्त्री ई पति भवामि भविष्यामीत्यादौ नातिसिद्धिः। आद्ये प्रत्य
यस्य सुप्निरूपितांगत्वेपि स्त्रीशब्दस्येपतिनिरूपितांगत्वाभावे नेयङ्प्राप्त्यभावात्। अप्येनिरूप्यनिरू
प्यनिरूपकभावः यथान्यासेपि अश्वश्यमाअयणीयः। अन्यथा सुप्निरूपितांगत्वेन तत्रेयङ् दुर्वारः। न च
भाष्ये योगविभागेन साधितं प्रत्ययग्रहणं यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषासिद्धि
रिति वाच्यं। तल्लक्षणन्यासेपि संनिधानाघतच्छब्दावध्याहृत्य न यापि यत्नाक्ष्तेः स तदादि तदन्तस्य ग्रह
णमिति वक्तुं शक्यत्वात्। यत्तु प्रत्ययविशिष्टस्येति। किं च राजपुरुषइत्यादेन लुमत्तेति निषेधात्पूर्वपदेप

तर्कचंद्रिका दत्वाभावेन न लोपानापत्तिरिति भावस्तथा ततोप्याधिकस्येति। देवदत्त ओदनमपाक्षीदित्यादौ देवदत्तादिश्य द्धो
५२ पत्तरे सुपे निमित्तीहल्स्य लुङः पर्यंतांगत्वात् तस्य लुङः पूरत्वेन तस्य देवा सूर्वे नप्पुडापत्तिः। अंगसंज्ञायाः प्रत्यय
52 निमित्तत्वाभावेन लुङादिनिरूपितांगस्यार्थस्य द्वैलभेत्वादिति भाव इति नव्यैरुक्तं शब्देन्दुशेखरे। तत्त्वासुवे
तस्य पदसंज्ञां प्रति कार्यित्वेन न हि कार्यानिमित्तत्वेनाश्रियत इति परिभाषया पदसंज्ञारूपकार्ये अत्र तिसु
पोनिमित्तत्वाभावेन न लुमतेत्यस्याप्रवृत्तेः। न च भत्वर्थायिनेनिनारिविषतीत्यत्रैव कार्यानुभवत एवं तथे
तिवाच्यं। प्रकृतेपि प्रत्ययलक्षणेन विशिष्टस्य कार्यानुभवस्याविशिष्टत्वात्। पद्म प्रत्ययग्रहणाभावेपि
विशिष्टस्य नांगसंज्ञाफलाभावात्। न चोरदित्यादौ प्रत्ययस्यानाक्षेपे परनिमित्तत्वाभावेन स्थानिकेन्द्री
वाप्रवृत्तेर्न संप्रसारणो इत्यस्याप्रवृत्त्या वकारस्य संप्रसारणासिद्धिरेव फलमिति वाच्यं। व्याप्येनाभ्यासेन
व्यापकस्य प्रत्ययस्याक्षेपसंभवात्। नहि अव्यवहितस्यैव तेनाक्षेपे प्रमाणं फलं वास्ति। किं चैकवच
नं संबुद्धिरिति सूत्रे सुसंबुद्धिरिति न्यासे प्रत्ययग्रहणपरिभाषयाविशिष्टस्य संज्ञा नाशंक्या। गस्य गुणः राम:
संबुद्धाविति व्यवहाराच्चेति भवद्दीक्षितास्तत्रापि जुसि चेत्याहोत याव्यवहारां दृगसंज्ञाविशिष्टस्य नेति तत्पापि ५२

सरूपाणामित्यादिनिर्देशेन हल्ग्रहणानुवृत्तिर्वा ५

पि

वकुशकवत्वात्। पदृत्ततोधिकस्येत्साधुक्तोतदृपिना। यथान्यासेसप्तम्यंतप्रत्ययग्रहणाभावेपि अंगसंज्ञाया:
पस्त्वाकुङादिविधिस्तदंगमितितन्दावभावितामात्रेणप्रत्ययनिमित्तंत्वासन्निमित्तोगत्वमादायैवोपस्थितत्वे
नाङादिव्यवस्थोपपत्तेः। एवंचयथान्यासेपिप्रत्ययइतिमास्तु। ङइदित्यादावभ्यासग्रहणेनापिप्रत्ययाक्षेपसं
भवेनवक्ष्यस्साद्दिप्रयोगसिद्धेः। एवंचप्रागभ्यासविकारेभ्योंगाधिकारइतिपक्षेपिदोषाभावः। बहुवचनेङ्
स्येत। अत्रझल्यितिमास्तु। नचरामाणामित्यादावतिव्याप्तिः। सन्निपातपरिभाषयातदप्रवृत्तेः। नचैवंसर्वेषां
इत्यादावव्याप्त्यापत्तिः। तस्याः अनित्यत्वस्यावश्यकत्वेनेष्टानिष्टत्वेनव्यवस्थोपपत्तेः। ननुजश्शसोरपिएत्वाप
त्तिरितिचेन्नासवर्णदीर्घेणबाधात्। यद्वाङतोवृद्धिर्लुकिहलीत्यनुवर्तनात्। बहुवचनेकिं। रामाभ्यां। पत्तुरामस्ये
तिप्रत्युदाहरणंपरिभाषाप्रवृत्तसामर्थ्येनंचतदसत्। अनित्यस्थलेलक्ष्यैकचक्षुष्कतायाः आवश्यकत्वेनसन्नि
तत्त पातपरिभाषाप्रवृत्तौबीजाभावात्। इष्टस्थलेप्यप्रवृत्तौन्यायस्यनिर्विषयतापातात्। अत्रबहुवचनङीत्येवसु
वचं। नचज्ञानयोरित्यादौनुमापत्तिः। अंतरंगत्वाद्धृतोकृतेऽङंततत्वाभावात्। नचवर्णादांगंबलीयः। समानाश्रय
त्वाभावेनतदप्रवृत्तेः। यद्वात्रतन्म्रहपरिभाषयासन्निपातपरिभाषयावानिस्तारः। पदाबहुवचनस्येडित्यस्तु
। एतेनज्ञानयोरित्यत्रनुमायत्यातन्यासस्वेङनेनवीनोक्तं अपास्तं। ह्रस्वनद्यापोनुट्। पत्तुशब्देंदुशेखरेन

तर्कचन्द्रिक वीना आहुः। यत्तु नु उ इति योगविभज्यनुदीर्घे यः। न घापद इत्यनेन दीर्घान्तान्नेव घाप एवेति नियमार्थं
५३ केन दीर्घेषु न दोषः। हलेतान्नेत्येतद्वचनं तु यथैवेत्सर्थकेन षट्चतुर्भ्य इत्यनेन हलन्तेषु न दोषः। एवे
53 ह्रस्वग्रहणेन कार्यं तत्र नान घापइत्यस्य स्त्रीलिंगानां चेन्न घाप एवेति नियमपरतयापि व्याख्यातु
कत्वेन नदीत्वाभ्यो योऽर्हस्त्वेपि दृष्टत्वात्त्वदुक्तनियमे दृढतरप्रमाणाभावेन च मतीनामित्यादौ तु उ
नापत्तेरिति। तत्राहुः स्त्रोपि आग्रस्येवाह्वालिंगेपि श्रुतिरवदइत्यादौ तद्दर्शनेन कुमारीणां कुमारीत्या रीति
दौ प्रथमलिंगग्रहणे चेत्यनेन नदीत्वदर्शनेनोभयोस्तुल्यत्वात्। यदि तत्र गौणमिति ब्रूषे आखे
ति तथा च विनिगमनाविरहादुक्तभयविधनियमः। ननु तथापि मतीनामित्यादौ दोषस्तदवस्थ इ
ति चेत् नोऽकारप्रश्लेषेण तत्सिद्धेः। वस्तुनः हि अनिष्टार्थो शास्त्रप्रवृत्तिर्भवितुमर्हतीति भाष्यात् ल
तेल क्ष्यदर्शनात् दीर्घविषयक एव नियमो भविष्यतीति दिक्। आदेशप्रत्यययोः। अत्र प्रत्ययपदे
[illegible]मात्रदवयवेलाक्षणिकं। तत्र तां प्रत्यग्राहकं तु हलि सर्वेषामित्यादिनिर्देशः सातिग्रहणं चाते षाष्ठ०
न साहित्ये समन्वा वादेहसिद्धेः। प्रत्ययस्येव विषयभेदान्देदस्वीकारे तु साहित्याभावात्सोत्रत्वाद्दृढस्त्र ५३

तिल्ल आचष्टेति सपत्नितंतः क्रियते रि

पणमिति कृशः एतेन सौत्रत्वाद्दृष्ट इति मनोरमायां स्त्रसंवेधहृद्यार्थक इति तत्त्वान्तरग्रे यथ्वापा
स्ततः पतु सिद्धान्तरत्नाकरे तत्त्वबोधिन्यां चादेशाव पवग्रहणेति स्वरइत्या दोषत्वापादनेन तत्त्वान्तरपर
स्यपि सजि स्पृशि स्पृहि सर्वनाम्नामित्यनेन निषेधात्तत्र षत्वाप्राप्तेः एवं च तिस्र इत्यत्र सकारोच्चा
२८ रणाभावमत्वाभावमाशंक्य [illegible] त्यत्र सकारोच्चारणस्य चरितार्थत्वापादनमयुक्तमिति स्वरइत्य
त्रैव सकारोच्चारस्य चरितार्थत्वादिति दिक्। ननु दधि सेचावित्यादौ षत्वापत्तिः न चोत्तरपदत्वे चापदा
दिविधौ प्रतिषेध इति प्रत्ययलक्षणप्रतिषेधस्यापदादिविषयत्वेनोत्तरवर्तिसुपा प्रत्ययलक्षणे
न पदत्वात्सात्पदाद्योरिति निषेधान्न दोष इति वाच्यं दध्नः सेचाविति विग्रहे तत्त्वे भवेपि सोप
पदात्तिचे वि चि गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरित्यनेन कृदन्तेन स
समासे तदसंभवादिति चेत्। अत्र केचित् अनभिधानान्नेदृशे कच द्रुवृक्तापक्षे तत्र विजेषनो
त्पद्यत इति बहुलारुमाहा। अन्ये तु गतिकारकेत्यस्यानित्यत्वमाहुः भाष्यकारास्तु पदद्वयादिति पंचमी

तर्कचंद्रिका समासमाहुः। तत्रानभिधानमनित्यत्वं चागतिकगतिकं। पंचमी भयेन सेतु बहुसे चादिसिध्यर्थं
५४ बहुव्रीहुर्वइतिवचनं कर्त्तव्यो इति गौरवं। मन्मतु प्रतिभाति। स्यातेरिति पृथक् सूत्रे तत्तः पदात्। अग ३२
तं सुबंते चोभय विधं गृह्यते तत्र दधि सेचादिक्त्योदा सुबंतं बहुसे चादित्यादे शक्यमिति यथा से
54 मवे वोध्यं न च शक्यपदं भाष्यासंमत्तमिति निरूमित्तव्यो नोर्विशइत्यत्र निरापि पदं विशिरपि पदं स
६५ वैं सर्वं पदादेशादित्या दौतद्दर्शनात्। एवं चोत्तरपदत्वेत्य त्रा पदादि विधावितिबहुव्रीहुर्वइति वचनकर्त साति
व्यं इतिलाघवं। न चेशक्यपदत्वस्वीकारेण पदादिरितिषत्वनिषेधप्रवृत्तौ वुभुक्षतौ स्यादावपि निषेधा ग्रहणं
पत्तिरिति वाच्यं मंत्रेषु सर्वेषामित्यादिनिर्देशेन ~~साति ग्रहणे~~ न प्रकृत्सु तत्त्रप्रत्ययस्य निषेधाभाव
वोधनात्। एवं च राजपुरुषेष्वित्यादावपि नातिप्रसंगः। अन्यथोत्तरवर्त्ति सुपापदत्वात्षत्वनिषेधः स्या
त्। न च स्वापकाप्रयुक्तो गौरवं। तद्धात्वा ~~दिवि~~ ~~मेष्वि~~ त्यादिसिदावपि नातिप्रसंगः। अन्यथोत्तरवर्त्ति सुपा
~~पदत्वात्षत्वनिषेध~~ धापिरामेष्वित्यादिसिध्यर्थं तदावश्यकत्वात् इति दिक्। भाष्येत्तरपदत्वे स्त्रिवा
र्तिकं भस्याख्यातं। तथाहि स्वादिष्ठि त्यत्र सुतिङ् तमित्यतः सुवित्यनुवर्त्त्य स्वादिषु पूर्वं पदं तद्व राम०
५४

अन्यथा सकार एवाविदध्यात् इति भावः॥ न च षः प्रत्ययोतिस्यादिति वाच्यं॥ षकारोच्चारणसामर्थ्यात्॥ न च [illegible] कारा भावे अकृ
सार्वधातुकयोरिति दीर्घ [illegible] ॥ सन्निपातपरिभाषया तदप्रवृत्तेः॥ यत्तु तत्राक्ङिङि तीत्यनुवर्तनात् नानतप्रवृत्तिः इति नाचेत्यं

यवभ्रन्तं यदि सुबन्तमस्ति तदपि पदसंज्ञं एवं भसंज्ञायामसर्वनामस्थाने यजादौ पूर्वं भसंज्ञं तदवयव
भूतं यदि सुबन्तं तदपि भसंज्ञं। एवं च परमवाचावित्यादावुभयविधपदत्वनिषेधः स्यात् परमवाचेत्यादौ
भत्वात् कुत्वाभावसिद्धिः। उणाकोः। विश्वपासु। यत्तु रामस्येति प्रत्युदाहृतं व्याख्यातं तच्च शरदं दुरोमवरे णाड-
सीति सूत्रे सकारोच्चारणमिरणाकोरित्यनुवृत्तावेव तात्पर्यग्राहकमिति भावइति। तन्न असन्यक्। विश्व
पास्विति निर्दिष्टप्रत्युदाहरणासंभवे रामस्येत्यादौ सकारोच्चारणसामर्थ्यादेव व्यावृत्तिसिद्धेः अनुवृ
त्तितात्पर्यफलकत्वेन व्याख्यानस्यानुचितत्वात्। न च सुपोपि सकारोच्चारणसामर्थ्यात् लिट्सुप्रशा
न्सु इत्यादौ चरितार्थत्वात्। सर्वादीनि सर्वनामानि। यत्तु तद्गुणसंविज्ञानादिति वृत्तीकसुपादायतस्या
न्यपदार्थस्य गुणाः विशेषणानि संविज्ञायन्ते कार्यान्वयित्वेन यत्रेत्यर्थः। आयः संयोगसमवाया
न्यतरसंबंधेन संबंधी यत्रान्यपदार्थस्तद्गुणत्वं तदतिरिक्तस्वस्वामिभावसंबंधेन संबंधिनस्तत्त्वे ज्ञ
हुणत्वं नागयज्ञोपवीतीभोज्यतामित्यादौ यज्ञोपवीतस्य कार्यित्वाभावेपि तत्संनिहितत्वावछिन्नवहु
व्रीहौ तद्गुणा तद्गुणत्वमुत षष्ठ्यर्थवहुव्रीहावेवानाद्यः। प्राप्तोदकः ऊढरथः उपहृतपशुः उपदशाः अ
1 नत्वमस्त्येवेति तद्गुणत्वमेवेति हरिं [illegible] न्यौः। अत्रेदं वक्तव्यं। किं बहुव्रीहि 2

तर्कचंद्रिक
५५
55

त्वा

सप्तविंशाद्यादावतद्गुणत्वेपिस्वस्वामिसंबंधेनसंबंधिनस्तत्त्वाभावात् । नञ्समासेतद्गुणसंपर्थबहु
व्रीहौसंयोगसमवायातिरिक्तसंबंधस्याप्रसिद्धत्वेनप्रायःपदस्यव्यर्थत्वात् । भवादिःसर्वाद्यो
षड्इतिसूत्रेमहत्ताप्रयत्नेनसंयोगस्यसंबंधत्वाभावप्रतिपादनेनपूर्वापरविरोधाच्च । किंचना
गयज्ञोपवीतीत्यस्यासाधुत्वेनकर्मधारयान्मत्वर्थीयइतिनिषेधात् । यदितुहृदमसर्पवान्वल्मी
कइतिवत्साधुत्वेषष्ठीसमासेनवातद्यापिबहुव्रीहिप्रकरणेतदुपन्यासनैव्यर्थंसुकूवाससंभोजये
त्युदाहर्तुमुचितं । यदितुमत्वर्थेपितद्गुणातद्गुणत्वेस्वीक्रियतेतर्हिदंडिनंभोजयेत्यादौत्वदुक्त्यासंयो
गस्यसंबंधत्वाभावेनषष्ठ्यर्थत्वाभावात्स्वस्वामिभावसंबंधएवप्रत्यासत्त्यातथाचदंडस्वामिकेए प:
वभोजनंस्यात्ननुदंडसंयुक्ते । मदुक्त्यातुदंडसंयुक्तेइतिद्गुणत्वंतत्रानचभोजनकालेदंडसंयोगोना
स्तीतिचेन्नकिंततः । दंडिनंपश्येत्यादौदंडस्यकार्यान्वयित्वेनतद्गुणत्वसंभवात् । नहिसर्वत्रकार्यान्वयित्वेए
वतद्गुणत्वमितिनियमः । किंचिद्दर्शनेनापितत्संभवात् । यत्तुतस्मिंहेरितिप्रतीकेतुयादृशपदेनचसवेना
न्वोव्रीहितत्वाभावः । तदेतत्संज्ञाभ्यांवृद्धिरैचेत्यादौनाममवयवसंज्ञाविशेषधकत्वेनविहितविशेषणेफलाभा पत्र.
वादितिभावइत्युक्तंवैयाकरणनव्यैः । तत्रापरमसर्वस्मैइत्यादौस्मायाद्यभावरूपफलस्यवकुंश्च ५५

कत्वात्। तस्मात् तदंतसंज्ञाभावः परमसर्वस्मै इति न फलं। एवमकज्ञपि न फलं। सर्वनाम्नः प्रातिपदिकविशे
षणे सर्वांतप्रातिपदिकादित्यर्थसंभवात्। न च समासप्रत्यये इति प्रतिषेधः शंक्यः। तस्यानित्यत्वात्। प
दघितत्तिलिति। अथ एवं सर्वनामत्वेन [redacted] नतु निर्बाधः। सर्वनामप्रकृतिकसमन्यायेन तत्त्वाभावा
दिति भावः इति। तदपि न तत्रापि सर्वनाम्नः प्रातिपदिकविशेषणे सर्वांतप्रातिपदिकाद्यासमभीत तदंतादि
त्यर्थसंभवात्। एवं च सर्वनामसंज्ञायां तदंतविधेः फलं चिंत्यं। अत्र सर्वादिषु उभशब्दपाठोऽनर्थः। न चो
भकौ इति प्रयोगसिद्धिः फलं। अन्यथा अकजभावे कप्रत्यये द्विवचनपरत्वाभावेनोभयेत उभयत्रेत्यादा
विवायच्छसेगादितिवा च्याउभाद्दुदात्तो नित्यमिति योगविभागस्येष्टसिध्यर्थतयानित्यमित्यनेन द्विवच
नपरत्वयोग्यस्वार्थिकप्रत्ययातिरिक्तवृत्तौ अयजित्यर्थकेनात्र तदभावात्। द्विवचन [redacted] परयोग्येति विशे
षणान्तृतसिलादिभावृत्तिः। वृत्ताविति [redacted] विशेषणादुभाभ्यामित्यादिव्यावृत्तिः। उभशब्दपाठप्रत्याख्या
नं कुर्वत्तो भाष्यकाराणाम यमेवार्थः संमतः। कैयटे तु कप्रत्ययस्य स्वार्थिकत्वेनव्यर्थबोधकत्वेनात
सो स्तु अव्ययत्वेन तदबोधकत्वमित्यत योरयजभवृत्तौ प्रवृत्तो च विशेषउक्तः। एवं च लाघवान्दाष्य
संमतत्वाच्च मदुक्तं एवं नित्यमित्यस्यार्थ उचितः। एवं च नित्यमित्यनेन द्विवचनपरत्वाभावे तत्राप्तु

णकचंद्रिको मशब्दादुत्पन्नो द्विवचने लुका नापहृतं ततोन्यत्रापि जितित्तत्परिष्कारं च स्वीकृत्य सर्वादिषु मशब्दपाठं च
स्वीकृत्य भाष्यकारस्य मौ टिवादेपरत्वपरमनोरमाग्रंथे तत्स्यात् ग्रंथश्च अपास्तः। यत्तु अंतरंगत्वादि
५६ ति सत्त्वप्रतीकमुपादाय शब्देंदुशेखरे उक्तं। नांतरंगवलीयस्त्वस्याप्ययं विषयः। युगपत्प्राप्त्यभावा
56 त्। असिद्धं बहिरंगमंतरंग इत्यादि तु। अंतरंगोत्तरं बहिरंगप्राप्तेः। तदुभयमपि पाक्षिकं। यथोद्देशपक्षे
तत्संभवेपि कार्यकालपक्षे युगपत्प्राप्तिसंभवात्। लक्ष्यानुरोधेन कार्यस्य प्राधान्येन च कार्यकाल
पक्षाश्रयणस्यैवौचित्यात्। तत्पक्षांगीकृत्य प्रवृत्तमलस्य तद्धारव्यात्। निर्मयोद्देशपक्षाश्रयेणाविड
न स्यादनुचितत्वात्। यदपि अंतरंगे कर्तव्ये बहिरंगासिद्धत्वेपि तत्प्रवृत्त्युत्तरं बहिरंगप्रवृत्तेरनयावारयि
तुमशक्यत्वात्। बहुराजस्य याजेः षत्वादिति। तदपि न। प्रवृत्तांतरंगकार्यविरुद्धबहिरंगकार्यप्रवृत्तेः क्व
चाप्यदर्शनात्। यदपि यथोद्देशपक्षाश्रयणे अंतरंगपरिभाषायाः अप्रवृत्तौ च तत्र यथोद्देशे उभयप्राप्तिबोध
इति वार्त्तिकमप्रत्याख्यानपरमेव स्यात् पूर्वांतरमिति भाष्ये मानं। तत्र याहि द्विर्त्रिः शब्दप्रवृत्ति काले पजेतस्यजेस :
शीविषये पुंस्येव षानाभिधानमिति तद्दाशयः इति। अपयन्त्यपांतरपक्षे भाष्याशयवर्णनं। तदपि न। राम
यथोद्देशपक्षाश्रयणेपि पूर्वप्रवृत्तांतरंगबाधायोगात्। न चैवं नेम शब्देपि विकल्पो न स्यादिति वा ५६

र्थो ऽनर्थकप्रतिहतानां विपरीतं बलाबलमिति न्यायेन तन्नान्तरंगमपि बाधित्वा विकल्पप्रवृत्तेः अन्यथा
शक्यं क्षुद्रुपहेतुमित्यत्र नपुंसकत्वस्य बाधापत्तेः । अत्र अव्ययान्तरमिति तु लाघवानुरोधादुक्तम् । तत्र शब्दलाघ
वे सत्यपि बहुतरयोगविभागगौरवात् । वार्तिककारमते वचनारम्भगौरवात्तत्रकारेणापरिभाषा
स्वीकृता । किंच भाष्यमप्यव्ययान्तरमिति नित्यमित्येतद्विषयकं न तु द्वित्रिभ्यां तयस्यायज्वेत्येतद्विषयकं
तथा चानभिधानमिति भाष्याशयं वर्णानमुधैव । यत्तु तथापीति कौमुदीप्रतीकमुपादाय प्रत्ययग्रहणेन
तदन्तग्रहणं प्रयोजनं सर्वनामाव्ययसंज्ञायामिति तदन्तविधिद्धये न उत्तरोत्तमेत्याद्यर्थं परमकतरस्याव्यप
देशिवद्भावेन कतरस्य च संज्ञासिद्धेरिति भावः । तत्र मानमाह । केवलयोरिति । प्रयोजनाभावात्केवलाभावात् ।
यद्वा प्रयुज्यते ऽनेनेति प्रयोजनं संज्ञाप्रवृत्तिप्रयोजकं सर्वार्थवाचकत्वमित्युक्तं नवीनैः । तन्न केवलयोः सं
ज्ञायामपि परमकतरकतरेत्यादौ सर्वनाम्नः परत्वमुपजीव्य शीभावसुडादिप्रयोजनसंभवात् । एवं च
विहितविशेषणतो कुत्रापि नाऽप्रयणीयमिति लाघवं संज्ञोपसर्जनव्यतिरिक्तयोः स्वार्थपरयोः सर्वार्थवा
चकत्वसंभवात् । यत्तु सर्वार्थप्रवृत्तिकत्वात्सर्वार्थकत्वाद्द्वितीयमपि ना अकजादिसिद्धिस्तु सर्वान्तप्रा
२२ तिपदिकादित्सर्थेनेत्युक्तमेव । किंच संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नेत्यस्य बाधो विनोक्ति लाघ

तर्कचन्द्रिका

५७

57

वांतर्बहुव्रीहौ। यत्तु मतुप्स्वहणामिति निमनोऽस्मात्प्रतीकस्तु यादाय षष्ठ्यन्यदिति सूत्रे प्रष्ठे त्यादावेंतरंगत्वात्तज्जा
तस्यतु कानिवृत्तये तत्क्रियते मतुड्ङि द्वैयासामर्थ्याच्चेनांत्य स्वरः। वांछा[illegible]दिप्रकृतिकक्विवंतादेरतु अप्र
युक्तत्वेन लक्षणाविषयत्वैवनेति उक्तं नवीनैः। तन्न। नांमर्थिके लोपविधिरनभ्यासविकारे इत्यनपेक्षात्वा व्या
वृत्तिसिद्धौ मतुड्ङि द्वैयेन वांवाछादिव्यावृत्तिसिद्धौ अनभिधानाद्भ्यणस्यप्र्यथलात्। प्रकृतिप्रत्यापत्तीति
। यत्तु के संघातग्रहणेतीत्यादौ लुकि गन्निमित्तकादेशानिवृत्तये क्रियमाणमाख्यानाल्कृतस्तदा च षष्ठे लुकु
प्रत्यापत्ति श्चेतिवचनमित्यर्थः। अत्रेदं चिंत्यं। लुक्यपि प्रत्ययलक्षणास्सलाप्राजाएने यइत्यादावि वाक्कृत
स्यह परिभाषाया अप्राप्तिः। नलुमतेतिनिषेधस्तु प्रत्यये परतो जायमानपूर्वकार्यएवेति स्पष्ट
मेव। तस्मात्तु युष्मयोगे जानाति पुष्पेण योजयतीत्येतत्साधके पुष्प्ययोगेस्तीति वचने भाष्यकृतप्रत्या
पत्यनुवृत्तिर्हि न्नापि कातंत्रेऽहि च जोरति घिति परतः कुत्वमित्युक्तं नवीनैः। तन्न। के संघातग्रहणेतीत्या
दौ लुकि निमित्तकएव वधादेशः स च लुग्वकारस्थंमतः। तथा च न लुमतेत्यस्य प्रवृत्त्या निमित्तवि
नाशे नास्तु रेवकृतस्यह परिभाषया वधादेशाप्रवृत्तौ [illegible] प्रकृतिप्रत्यापत्तेर्व्यर्थत्वेनानाकृतत्वस्यह प राम ५७
रिभाषानित्यत्वज्ञापनसंभवात्। किंच। अत्र प्रत्ययलक्षणप्रवृत्तिः स्वीक्रियते उतनानाघं

ग्रक्षन्निमित्तत्वं विनाप्रत्ययनिमित्तत्वाभावेन तन्निमित्तत्वे च न लुमतेत्यस्य प्रवृत्तेस्तुभयथापि प्र
त्ययलक्षणाप्रवृत्तेः। नाप्यः प्रत्ययलक्षणासत्त्वादिति भवपुकेव्याघातात्। द्वन्द्वे चेति। बहुव्रीहावि
चन्द्रिका त्वदुक्तहेतोरसिद्धेश्चाकिमः कः। ननु इमः इत्येव सूत्रमस्तु। त्यदादेरिमः अः इति सूत्रार्थः। न वा लोपस्य
स्येत्यस्य प्रवृत्तिः नानर्थकेऽलोऽन्त्यविधिरिति निषेधात्। न च मो इत्यत्राप्रवृत्तिः। अंगवृत्तपरिभाषया
७७ निषेधात् स्यानिवृत्त्यादेशेन द्विर्भक्तिपरत्वाभावात्। न च कृतिहोः घ्रातोत्पत्त्यानुहत्वपर्यमावश्यकता
77 तत्रापि उतिहोः अतीतिन्यासेन निर्वाहत्। न चान्त्यादेशगुणायप्रिरिवाच्यं नानर्थक इति परिभा
षयांगकार्ये कृते पुनर्नांगकार्यमिति परिभाषया चादोषात्। न चाकच्छिशिष्टस्य कः इति रूपा
पत्तिः। कादेशविधेस्तामार्थ्यस्य कः इत्यनेनतार्थग्रहाभावे प्रर्थग्रहाभावे प्रतीतेस्सात्राकचोन
भिधानात्। वाक्येनैव तदर्थप्रतीतेः किंच निर्दिश्यमानपरिभाषयाकष्कस्य कादेशप्राप्तिरपि ना
स्ति। अत एव भाष्ये भिधकी सत्राकविधित्वं न प्राप्नोति प्राप्ताननागत्वाद्वित्वे कजिस्त्वं। के घ्व
देन तस्य आहत्यासाकच्कस्य कादेशत्वः। न चैवमशादेशोपि साकचस्य न स्यादिति वाच्यं विवा
नसामर्थ्येन निर्दिश्यमानपरिभाषाप्रवृत्तेः सकचस्य कादेश इति दुराग्रहे हइमः कः कृतिहोः अ
तीतिन्यासः कार्यः। त्यदादेरिमंतस्य कः कृरिति व्याख्यानेन निर्वाहः। न च निर्दिश्यमानपरिभाषये राम० ७७ २

मएवस्यादितिवाच्यम् । मत्वर्थादित्वासंभवेनैमत्स्यैव निर्दिश्यमानतयापरिभावात् च वैय्यधिकरणे
नान्वयः । सामानाधिकरण्यसंभवे तस्यान्याय्यत्वात् । तस्मादत्रसः मनोरमायां यत्तदुक्तमस्मात् ग्र
घस्त्वायात्तरमणीयतरा वेति स्वधीभिर्वैध्यमिति दिक् । हलिलोपः हल्ङ्याशितिवक्तव्युक्तं । एवचालोप्रशके
वन । अन्यथानानर्थकेइति परिभाषयाअलोन्त्यस्त्रपेत्वाभावात्तस्यारंभात् । तयोः आश्रंयणेगौर
वस्यात् । सामुङ्गात्रात्रयलाघवं च च इदमोत्वादेशोऽस्तांम्यामिसत्राशोऽनुदात्तत्वादंतोदात्तत्वमुपजीव्योदि
दमितिस्मावेकाच इतिवाविभक्तेरुदात्तत्वंस्यात्तेनाभ्यामिति सर्वत्रानुदात्तपदेनाडिसंबुध्योः अत्र तमसंवुद्धे
रितिवक्तुमुक्तं । परमेव्योमन्नित्यादावयंस्सपादित्वेनमतान्नलोपाभावस्यसिद्धत्वात् । सर्वेवेदाना
घ्योलोकत्तुपदात्तत्वाभावादवग्रपोजनाभावात् । समासे संभवेपिअवुत्तपदेप्रतिषधइतिप्रति
षेधात् । यत्तुव्याख्यानत्वितितत्तुतान्यविर्वोधितासत्यपित्तपाठेविलुमतेतीतिनिषेधानित्यत्वेनवान
पुंसकानामित्यस्यसिद्धिरितिलाघवमस्तीति शब्देंदुशेखरेनिरूक्तं । वस्तुताएवंलाघवस्वीकारेतुस्या
नित्वत्सूत्रेएववाग्रहणंकृत्वाव्यवस्थितविभाषाश्रितत्सयलव्हाणमूत्रस्यतनिषेधवोधक
नलुमतेतिसूत्रस्यतथावातप्रसंकेतिवार्त्तिकस्यापित्त्यर्थसंतत्वभवात् । नचव्यवस्थितविभाषा

तर्कचंद्रिका
७८
78

अयमेन प्रत्याख्यानेन चमत्कारावहमिति वाच्यं अतिसत्वाश्रयेणापि प्रत्याख्यानेन तथात्वात्। उ
त्तरपदे इति। अत्र शक्तमपि पदेप्यते नेन तु सुवचमेव तेन राजतीवाचरति राजीयतीत्यादौ न लोपः
सिध्यतीति। न च परमे व्योमन्नतिष्ठितेत्यादावुत्तमस्तेपि न लोपापत्तिः। पूर्वइत्येव सिद्धे उत्तर
शब्दोपादानेन तत्पुंस्तगतस्यैव ग्रहणात्। अत्रोत्तरपदशब्दो न रूढः किं तु यौगिकः तेन च मेति
वहवस्त्रिला अस्येति मध्यमपुरेषु भवति। भाष्ये तु अयमस्मापास्मदित्वेन भत्वपदत्वे स्वीकृत्य
परमे व्योमन्नित्यादौ न लोपाभावो यथोक्तीवृत्तिसिद्धो रूढेरुङि ग्रहणप्रत्याख्यानात्। तथा च तन्नि से
घकं वार्त्तिकमपि अयात्प्रत्याख्यातं। न च संबुध्यर्थमिति वाच्यं हे राजन्नित्यादौ तस्याहेसमासा
संभावात्। नलोपस्तु स्वरा। अत्र विधिशब्दो भावसाधनः संवेधमात्रमन्यषष्ठ्यंते न समासः तेन रा
जभिराजन्यानित्यादौ स्यान्निमित्तो भयस्तेवे घेपितिपमप्रवर्त्तते। अत एव भाष्ये सर्वविभक्त्य
तः समास इत्युक्तं। व्याख्यातं च कैयटेन सर्वविभक्त्यर्थक षष्ठ्येति। एतेन सर्वविभक्त्यावयकः स
मास इति भाष्यस्यार्थः। विधिशब्दो भावसाधनः कर्मसाधनश्च। तत्र स्वरादिविषये भावसाधनः स राम०
पविषये कर्मसाधन इति शब्देन्दुशेखरोक्तमयाक्तं गौरवात् फलाभावात् भाष्यानुक्तत्वाच्च स्वरविधौ ७८

पचार्म। अत्र तद्धितार्थेति समासेन लोपेऽवर्णांतं पूर्वपदमिति अर्मे चावर्णाद्धु चमजिति पूर्वपदाद्युदात्तत्वं
प्राप्तं नलोपस्यासिद्धत्वान्न भवति। अत्र द्विसंख्ये संज्ञायामिति समास इति केचित्। तन्न। संज्ञाभावात्। यद्यपी
त्यनुवर्त्तमाने तद्धितार्थेति समास इत्यर्थ इति तत्सामर्थ्येनोतदपि नासंप्रतीस्तत्रानुवृत्त्यभावेन तद्धुत्तरमिति
शब्दस्यायुक्तत्वात्। तास्मन्नुदायोत्तरेमिति शाब्दस्यैकदेशो च यस्याविषत्वात्। संज्ञायामित्यस्य स्वार्थे त्वाच्चा
न चात्र नलोपस्यासिद्धत्वेपि स्वरविधौ व्यंजनमविद्यमानवदिति विद्यमानवद्भावात्स्वरः प्राप्नोत्येवेति वा
च्यं। मा ष्प्रेयतो नावइत्युत्तरसूत्रलकहल्स्वरप्राविस्तुकत्वात्। भाष्ये कंपट्योस्वरविधेरुदाहरणं नोक्तं तत्रवी
जं चिंत्यं। यत्तु संज्ञाविधौ प्रत्ययविधौ चेत्यत्र नलोपे कृते पीत्यादिना स्त्रीप्रत्यये प्राप्नुवन्त्यपीति मनोरमायामुक्तं तन्न
ष्पविरोधादुपेक्ष्यं। तथाहि संज्ञाविधौ किमुदाहरणं पंचसप्तन्नलोपे कृते षट्संज्ञा न प्राप्नोति असिद्धत्वा
द्भवति। संज्ञाग्रहणानर्थक्यं तन्निमित्तत्वाल्लोपस्य। नाकृतायां षट्संज्ञायां जश्शसोर्लुक् न चाकृते लु
कि पदसंज्ञा न चाकृतायां पदसंज्ञायां नलोपः प्राप्नोतीति तदेतदानुपूर्व्यासिद्धं भवति। स्याद्युक्ते तर्हि हे
उद्दत्तौ दत्तवहितौ। अत्र नुलोपस्यासिद्धत्वमपि त्वाभावे हे वीत्यस्याप्रवृत्त्या पूर्वनिपातानि यमः सि
ध्यतीति। नवीनैरपि शब्देन्दुशेखरे इदमेवोक्तं इतु चिंत्यं अत्रापि प्रकृतिमात्राज्ञ यत्वेनातिरंगा यां विसे

जायां प्रकृतिप्रत्यययोश्च पठनेन बहिरंगत्वस्यासिद्धत्वात्। यद्वा दृंहेः कर्तव्ये यः धिमन्तकस्तस्य पूर्वं निपात
इति व्याख्याने दोषाभावाच्च तस्मात्संज्ञाविधावितिव्यर्थं सत् ज्ञापयति अन्यत्र भावाभासिद्धत्वस्याप्यपे
नियम इति। यत्तु सुलत्तधाप्यधमविष्ठिन्नोद्दे रूपकविधेर्ग्रहणात्। एतेन दंदशिष्वित्यादौ यत्वरूपस्तुषि
धावप्राप्तासिद्धत्वविधानार्थमिदं नियपप्रासत्ते वैरूप्यापत्तेश्चेति शब्देन्दुशेखरे नवीनैरुक्तं। तत्राग्रोरवात्
कृताभावात् भाष्यकाराघनुक्तेश्च दंदशिष्वित्यादौ यत्वस्य सुवितत्वात् तत्त्वेसति सुप्रकृतिलक्षणपधर्मोक्ति
तत्वाभावेनैव निर्वाहात्। वस्तुतस्त्विदं मर्थ्यं पूर्वत्रासिद्धमित्यस्यानित्यत्वेनैव सिद्धत्वात्। न संयोगा
द्यन्तात्। वम्याभ्यां संयोगस्य विशेषणान्न तदंतलाभेन तग्रहणं येन विधिरित्यस्यानित्यत्वेनैव सिद्धत्वापत्त
तिति न समासप्रत्ययविधौ प्रतिषेधः उगिद्वर्णेत्यादि सिद्धं॥ हो हंतेर्ञ्णिन्नेषु॥ अत्र पुनः अनुवृत्तग्रहणाभावे च षेद्व्रत्र
हयतीत्यादावप्यापत्तिः। धातोः स्वरूपग्रहणे इति परिभाषया धातुसंशब्दनेन विहितप्रत्यय एव तद्ग्रहणा
न्नात्। हननीयते राडुलिते दंग्रवर्जिते येन नाम्नवे धातनितिन्यायेन ञ्णिद्विषये वर्णद्वयन्नवधा
नेप्रवृत्तिः स्वीकारात्। हितेरत्र्पूर्वस्य। अत्र योगविभागेन सर्वत्रत्वानियमः। तत्र पूर्वग्रहणं व्यर्थ्यं। अन्य
त इति पंचमहांतेनैव कंवेसामंजस्यात्। ननु तपरत्वं विवक्षितमुत्तवा। अर्थावेद्व्रहाणीत्यादौ णत्वं न

स्यात्। इत्युक्तेऽपि प्राघानीत्यत्रापि णत्वं स्यादिति चेन्न। आद्ये प्रकृतिप्रत्ययोभयनिमित्तत्वाद्बहिरंग

स्य दीर्घस्यासिद्धत्वात्। इत्युक्तेऽपि प्राघानि सिद्धत्वेनादोषात्। इत्युक्ते पि शायानीत्यत्र तु यथोद्देशपक्षे बहिरंगपरि

भाषाप्रवृत्तावत्रासिद्धत्वाभावेनादोषात्। न च कारणोपाधिवृद्धिषु इत्यनेन हन्तेः प्रत्यये घ्नादेशे पूर्वपद

दिति णत्वे दुघ्नाः इत्यत्र इव प्रघ्नन्ति इत्यत्रापि प्रसक्तौ घ्नन्ति इत्यनेन नातिप्रसक्तौ णत्वे नि शेषाद्धन्तेरत्ति इत्य

तथा प्रघ्नो घ्नन् इत्यत्रापीति वाच्यम्। प्रघ्नाति हन्तेर्णत्वविधानेनोपसर्गात्परस्य घनस्य णत्वाभाव

ज्ञापकत्वात्। एवं सति तथा नोदेशो इत्यनेन नति ष्यतोपि प्रसज्यात्वावपदादिति णत्वं भवत्येव। अन्तर्घणो देशो

ति णत्वविशिष्ट पाठो युक्तः॥ भाष्यरीत्या तु नेमे हन्त्यादेशाः किंत्वखण्डनिपातनानि अन्यथापि त्वा

दनुदात्तत्वे घ्नन् इत्यंतोदात्तपदेन स्याद्वा आदेशपक्षे तु घ्नान् इत्यकारात आदेशोऽनुदात्तात्तो वि

धेयः तस्य लोपेऽनुदात्तस्य च यत्रोदात्तलोप इत्यनेनोदात्तत्वविधेयमिति क्लेशः। तद्गीत्या प्रघ्नन्तु

इत्यत्र णत्वशंकापि नास्ति प्रघ्नाघव इत्यत्र हन्तिस्थाने घ्नन्ता घनादेशाभावेन हन्तित्वाभावाण्णत्वशंके

व नास्ति षाष्ठद्वित्वस्य दिः प्रयोगत्वेऽपि विकारागमाभ्यां हन्तित्वाभावात्। एवं ज्ञापकेन सिद्धत्वाच्च॥

वार्त्तिककारेण सर्वग्रहणपक्षस्यैव चित्कार्यकालपक्षःस्यैव विपर्यादेशापक्षे योगविभागत्मस्व
वाच्यसामान्यचिन्ताचेतिगौरवात्कुव्यवाये इति वार्त्तिके कृतं त्वाष्यकारैरपि तद्देवस्वीकृतं। एतेन
हादेशेष्विति प्रतीकमुपादाय हादेशाकवर्गव्यवाये इत्यर्थः। आर्षत्वाद्वार्त्तिके समासः वार्त्तिके
हादेश इत्युक्ते दुघणा इत्यादौ सर्वपदादिति णत्वं सिध्यति तत्र हि हेतेरपप्रत्ययो घनादेशश्च
अतएवांगारैकदेश इति सूत्रे प्रघणप्रघाणयोः क्तेत णत्वयोरुच्चारणं। तत्रापि हेतेर्घनाघादेशा
वधानात्। न्याय्यत्वादिति। न च वार्त्तिकरीत्या बहुदूत्राहाणाति णत्वमायाति सूत्रारंभे तु नेति वा
र्त्तिकारंभस्यैव न्याय्यत्वात्कथं न्याय्यत्वाबहिरंगत्वेन दीर्घस्यासिद्धत्वेन प्राघानीत्यत्र दोषः। त
थासूत्रारंभे प्रघन इत्यत्र णत्वं प्राप्नोति वार्त्तिकरीत्या तु नेति वाच्यं अस्तु सर्वस्येत्यनेन हस्यानिक
कवर्गाभावबद्धेतेरेवोपलक्षणेनादोषात्। प्रघाणप्रघणयोः क्तेत णत्वयोरगारैकदेश इति सू
त्रे उच्चारणमत्रत्यात्सर्वग्रहणस्योक्तार्थोपलक्षणत्वेमानं णत्वनिपातकल्पनापेक्षयोक्ता
र्थेतात्पर्यग्राहकत्वादितिभावः स्तदेतद्ध्वनयन्तोकं वार्त्तिकार्थोपसंग्रहस्येतीतिनवीनोक्तमपा

स्तं॥ मनोरमायां वार्त्तिकार्थोपसंग्रह इत्यत्रार्थशब्दः प्रयोजनवाची तेन वार्त्तिकप्रयोजनानि ह्रस्वग्रह
स्तु मः साध्यानीति तानि सूत्रेणैव सिध्यंतीत्यर्थः। न तु भवदुक्तानि धेयपरः॥ तेन हस्थानिककव
र्गानाववदिति मूलव्याख्यानमनुचितमेव। किंचात्र हस्थानिकत्वं साक्षादुद्देश्यकत्वमुत समु
दायांतर्गतत्वेनापि। नाद्यः प्रघन इत्यत्र हस्थानिककवर्गाभाववद्धेतित्वाभावेन णत्वापत्तेः। ना
न्त्यः द्रुघण इत्यादौ णत्वानापत्तेः॥ निर्वीजलक्षणाग्रो गौरवं च॥ उगिदचां सर्वनामस्थानेऽधातोः
॥ अत्रोचातिग्रहणं नियमार्थं औपदेशिकधातोस्तद्धितप्रत्ययस्य चेदुगित्कार्यं तर्हि नलोपिनोंच
तेरेव विनयथा स्यान्मनुख्वास्त्रच्छ नीत्यादौ नोऽव्याप्तिः। प्रत्ययविधये मानं तु लाघवादच इति
वक्तव्येऽधिकसंग्रहार्थं बहुवचनं तेन धातुतद्धितप्रत्यययोर्नियमः॥ एवं चाधातुग्रहणमस्तु त्य
जं। नन्वेवं शमीत्याद्यानि विविद्वानित्यत्रापि नुमो नापत्तिः वसोर्धातुविहितप्रत्ययत्वातिचेन्न। औपदे
शिकप्रत्ययत्वस्य विवक्षितत्वात्। वसोस्त्वातिदेशिकप्रत्ययत्वं न तु औपदेशिकं। यद्वा स्यान्नुगि
त्वादेव सिद्धे पुनरुगित्करणं सामर्थ्यान्नुम भविष्यति। वसोरुगित्करणस्याविशेषणार्थत्वेन तु शत्रुप्रत्यय

तकेचेद्रि स्योगित्करणसामर्थ्यादुकारांतधातुविहितप्रत्ययस्य भवत्युगित्कार्यं॥ धिनुणस्तु नोकारांतत्वं
मितिनतत्रनुज्ञायहोपेयिवानितिनिर्देशोनभवतिवस्वंतस्यनुम्॥ नन्वौपदेशिकधातोश्चेदि
८१ तितिपमेगोमानिवाचरतीस्वीगोमानित्यत्रोगित्त्वश्चेति उ॰प्र॰संगः॥ नचेष्टापत्तिः॥ सूत्रभाष्य
रो विंध्यादितिचेन्न॥ उगितश्चेत्यत्रचकारस्यैवकारार्थत्वेनसंज्ञातरानुपहितप्रातिपदिकएवलब्ध
४। धानात्॥ अत्रतुधातुसंज्ञोपाहितप्रातिपदिकत्वान्नदोषः॥ नचैवंप्राचीत्यत्रापि उ॰प्र॰नस्यादि
तिवाच्यम्॥ नौपदेशिकेतिविशेषणात्॥ ननुचकारादेतादृशार्थःकथंलभ्यइतिचेत्॥ तत्रत्तेनेस
न्नेतिशेषः॥ अन्यार्थविशेषवत्त्वापिसंभवात्॥ भाष्येतुसामान्यनियमं॥ स्वीकृत्यपुंवोरनाका॥ वित्तिसूत्रे
नपुंसकस्यझलचइत्यत्रयोगविभागमाश्रित्य ऊ॰ह॰इत्तुभाष्येशेषइतिमाख्यायशमीत्यादौनुम
भावःसाधितइत्यलमितिदिक्॥ नसंप्रसारणेसंप्रसारणं॥ इदंसूत्रेत्यर्थंतुशकं॥ सूत्रमत्वेका
र्येकालपक्षमाश्रित्यैकवाक्यतयाविधानाद्यण्प्रत्ययेपरत्वेनसंबंधात्प्रत्ययाणएवयेननाव्य राम॰
वधानमितिन्यायेनतत्संभवात्पूर्वेपर्णांप्रासभावात्॥ यथोद्देशपक्षेपिवाक्यस्यतदर्थस्यवासंज्ञि ८१

ङित्वात्पूर्वान्तु । यर्थसंभवात् । मद्गुत्करीत्यादिप्रदेशे षष्ठ्या गुणो ह्रस्वात्स्तत्रप्रसंगाभ्यासान्न पद्धेतुपदादर्शनेऽपि
दोषाभावात् । न च नाष्टपेतन्मप्रत्ययात्व्याप्तमिति वाच्यं । लोपवान्नुरोधे न ततः स्त्रीकारे बाधकाभावा
त्तान न्ह्रुयायेऽश्रग्रहः । उपेप प्रतिपत्त्यर्थले षामव्यवस्थितत्वात् । एवं च गुणस्तत्र न संप्रसारणो
तित्तन्निषेधस्तत्र वचनकर्त्तव्यमिति महद्भाष्यम् ॥ निषेधसामर्थ्याद्वचनाभावेऽपि च श्रयणीयमिति
दिक् ॥ अर्वणस्त्रसावनञः । अत्र साविति प्रसज्यप्रतिषेधः । नतु पर्युदासः । बहुवर्वादित्यसिद्धा
पत्तेः । ग्रंथकारेण पि न तु साविति वदृष्टत्तस्यैवांगीकाराज्ज्ञाः । एतेन पर्युदास एव स्तुचितः प्रस
ज्यत्वेन च साद्ध्यमिति नवीनोक्तिरपास्ता ॥ अनञः किं । अनर्वाणि नपुंसके प्रत्युदाहरणं न
तु पुल्लिंगं स्त्रीलिंगं च विकल्पत्वात् । एतेन नानञः किमिति । अनञ इत्यस्य कः शब्दो व्यावर्त्यः इत्यर्थः ।
उत्तरमनर्वेति । यज्ञ्वशब्दसदृशो नर्वशब्दो व्यावर्त्य इत्यर्थ इति नव्योक्तिरपास्तेति केचित् । तन्न
नञ्योगे न प्रत्ययमुपाद्द्वोपेन नपुंसके प्रत्युपपरत्वाभावेन तत्र आदेशस्य तत्रा प्रवृत्तेः । अन्यथा
वर्मि यदित्यत्रापि स्यात् । सहस्रदृगर्वा गार्वेति श्रीहर्षप्रयोगोपि तत्रानुकूलः ॥ अत एव मूले

गार्क.वाद.
८२
४१

गार्ग्येपेतौ वासिद्धे पर्युदासे प्रयोजनाभावात्प्रसज्यप्रतिषेध एवाश्रितः॥ इंद्रेव मत्त्रेत्र द्वं पं सर्वेणास्त्र
मघोनश्च नशिष्यं छांदसं हितत्तः। मतुप्रत्ययोर्विधानाच्च छंदस्सु भयदर्शनादिति वार्त्तिककारेण।
प्रत्याख्यातं। तथापि तत्सौठिवादपात्रे। सो परतः नञः परस्य प्रतिषेधवार्थेत योगावश्यकत्वं तु।
च छांदसत्वेन निर्वाहः। वैदिकमात्रप्रयोगविषयाणामत्राणामेवं वै प्रप्र्थापत्तेः। तिषास्वीरे
रतयोः प्रत्याख्याने विनिगमकाभावात्। न च भाष्यकै प्रयटयोरपि तत्त्वोक्तमिति वाच्यं। वार्त्तिका
शयवर्णनमात्रपरत्वात्। एवं च लोकेपि प्रयोगो निर्बाधः। अत एव कोशे श्वपयोर्येदं द्वपर्याये
चतयो रूपादानं। नहि केवलछांदसानां लौकिकपर्यायेषूपादानमस्तीति दिक्। यथिमथ्यनु
क्षाणां। अत्र त्र्यादिसेवस्तु वचं। एवं चोतरसूत्रे दितिन कर्त्तव्यमिति लाघवं। न च परस्पराप्तिः। पथि
मथ्येमुक्षां लोपः। भस्य टेः इतः सर्वनामस्थाने इतिन्यासेन सिद्धेऽकारसामद्विधानं यत्तत्र
त्रसानुनासिकव्यावृत्त्यर्थं। अन्येषोपि मास्तु। विधीयमानत्वेनभिन्नकालप्राप्त्यभावात्तपरकर राम.
णासामर्थ्याद्गुणांतरव्यावृत्तिसिद्धेः॥ यत्तु भाष्ये त्वनुनासिकविधाने प्रतिपत्तिलाघवाय तत्स्यैवोक्ता ८२

त्वकुत्वेपि तस्याकर्तव्यायां नलोपस्यासिद्धत्वेन सन्निपातविघाताभावात् ॥ एवं च परिभाषानित्यत्वे
नात्वप्रतिपादकः । अनोरमागमेथः तत्र व्याख्यानत्वेन थल्क्योपेक्षपः ॥ संनिहितेति । तेनातिजादीनां न । अत्र
ति दुः किं । रूढिवेत्यादौ नेड्वशिकृतीति निषेधो मा भूत् ॥ किमर्थं प्रत्ययस्य कुः । प्रत्ययग्रहणसामर्थ्यादत्त
न्दुणोऽस्य विज्ञाने बहुव्रीहिः । न च प्रत्ययग्रहणाभावेऽक्किन एव कुत्वं स्यादिति वाच्यं । तस्य लुप्तत्वात्
। एतेन न च तदभावे वस्य कुत्वापत्तिः तथा सति क्विनो घइत्येव वदेदिति शब्देन्दुशेखरोक्तमपास्तं
। प्रत्ययग्रहणोत्तरं तग्रहणमिति तदंतस्यैव संभवात् ॥ नन्वतद्गुणबहुव्रीह्या अघरोरज्जुसृड्
पपद इत्यत्र क्विप्यपि कुत्वं स्यादिति चेन्न । सृजिदृशोरिति सूत्रे कामन्नज्वृत्तिसूत्रे च भाष्ये रज्जुसृड्भ्या
मुपपदकामत्तीर्ति प्रयोगोऽस्य सृजियज्योः पदांते कुत्वाभावज्ञापनात् ॥ विश्वस्य वसुराटोः ॥ अत्र वि
श्वशब्दः सर्वपर्यायो गृह्यते न तु देवताविशेषवाची । व्याख्यानात् । अभिव्यक्तपदार्थत्वाद्दाराट्
इत्यनभिव्याहृतविश्वासिद्धसाहचर्याद्वा । एवं चादित्सविश्वावसव इति अमरप्रयोगः संगच्छते ॥ शब्दे
न्दुशेखरे तु नरे संज्ञायामित्यतः संज्ञापदापकर्षणात्तदुपप्रयोगः साधितः ॥ तदसत् देवताविशेषवा

चिन्नोपि विश्वेदेवा दशास्त्तता इति संज्ञात्वात्। संज्ञापदापकर्षणो नापि व्याहृतसंभवात्। एकाऽसं
योगाद्योरितेच॥ ननु प्रत्ययकृत्स्थाने ताप यः स्थितिरित्यादावपि लोपः स्यादिति चेत्। अत्र केचित् हल्
ङ्यादेः प्रत्ययस्यैव लोपमिच्छन्ति। अन्ये तु ताद्दशप्रयोगाणाम् अनभिधानमेव तत्र मानं तु काष्ठ
शगेवन्नास्ति कुतः काष्ठशक् स्यादिति भाष्यमाहुः॥ ममतु मति भाति। ऊलीसत्रापि पदस्येन्य
स्य संबंधात् संयोगान्तलोरेकपदस्थत्वेएव लोपः॥ तथा च न कोपि दोषः॥ तदोः सःसावनन्त्ययोः
॥ अत्रानेत्सग्रहणं शकामकर्त्तु॥ तकारसाहचर्येणानेत्यस्यैव समवात्। केचित्तु हेसेत्यादे
सत्वे जातेपि पुनःप्रसंगविज्ञानेनालं महः। अन्ये तु दस्य चेत्सत्वं तर्हि अदस एवेति अदसयो
गविभज्यार्थमाहुः। ङे प्रथमयोरम्। अत्र प्रथमा शब्दः प्रथमाद्वित्तीयासमुदायेगौणः। त
था चैकपदमेव। लद्वणाः यां माङम्वाघनार्थं वृश्मास्राने ति सूत्रमेव अन्यथा तस्मादित्यत्रेने ने
वसिद्धे तदर्थं स्यात्। एवं च ङे इति लुप्तषष्ठीकम् इति केशोपि न। किं च पृथक्पदत्वेपि वचन रा०म०
योरित्यथा शवास्यात्। तस्मात् न तोरमा यां पृथक् सर्वत्वस्वीकारो व्यर्थः। वाहो सो॥ अत्राकारो ८४

विवक्षितः। एवं च स्यष्प्रातिपन्नयेत्वहोस्माविर्लेववक्तुमुक्तं।। एवं च मात्रालाघवं प्रक्रियालाघवं
च भवति।। न च राशिजंतात्किपि युष्मस्मद् इति प्रातिपदिकयोरादेशे विशेषोऽस्तीति वाच्यं।। सोर
मादेशे विशेषाभावात्।। न च नपुंसके लुगापत्तिः। मकारप्रश्लेषेणाशीभाव इव तस्याप्यप्रवृत्ते
। एतेनादेशयोर्हलंतत्वे हे कतरद्दिमत्रेवर्हलत्वेह हे समत्र मलोपो न स्यादिति केषांचिदुक्तिरपास्ता। प्र
वींकरीत्यात तत्र मलोपाभावे हे त्वं हे हम् इति तिर्मांत स्येव तत्र साधुत्वात्।। त्यदादेः संबोधनाभावाच्च। शे
षे लोपः। अत्र शेषग्रहणं शाकमकृत्तुमपर्यंतस्येत्यस्य संबंधी विभक्तिविपरिणामेन मपर्यंता
स्य रस्य लोप इत्यर्थसंभवात्।। अलोंत्यपरिभाषातु न प्रवर्त्तते नानर्थक इति परिभाषया।। एवं चा
त्यलोप इति पक्षो निर्मूलः। न च सामस्माकमिति ससुट्निर्देशो ज्ञापक इति वाच्यं टिलोपे कृते हि
साम अस्माकमिति लघुन्यासेन लक्ष्यनिर्वाहे गुरुभूतससुट्निर्देशेन ज्ञापकत्वस्वीकारे फला
भावात्। किं चास्मिन्लोपे युष्माकमित्यत्र नुट् दुर्वारः यदि अपवादेन निषिद्ध उत्सर्गो न प्रवर्तत इ
ति ब्रूषे तर्हि अतिलाकमित्यत्र डडायतिः दुर्वारैवा भाष्ये तु सत्यासायवर्णिनमात्रेनतुतत्रागमः।।

॥ एवं च टिलोपपक्षे एव सर्वसंमत इति दिक्॥ भ्यसो भ्यम्॥ अत्राभ्यमिसेव पदच्छेदः न तु भ्य

 मिति। अन्यथा लाघवात् सुप्रतिपत्ते भ्य भ्यः इ भ्यसः इत्येव दद्यात्॥ अत्राभ्यमत्तु पक्षच्छेदे

 पि साधुरिति कौमुद्यां तन्न। णिजेत्ताल्विपि अभ्यमिति रूपे विशेषस्त्वात्॥ असल्लोपप्र

वृत्तिरीत्योक्ति संभवाभावेन फलाभावेन च पक्षद्वयाभावाच्च॥ एकतिङ् वाक्यमिति॥ एकति

ङन्तार्थमुख्यविशेषकं वाक्यमिति निष्कर्षः॥ न च देवदत्तेन शायितव्यमित्यादौ अव्याप्तिः अ

स्ति भवंती परोऽपि प्रयुज्यमानोऽप्यस्तीति भाष्यात् तत्रापि तिङन्ताध्याहारेणाव्याप्त्यभावात्॥ ए

वं पचतीत्यत्राप्यध्याहृतकारकमादायैकवाक्यत्वबोध्यं॥ समर्थसूत्रभाष्ये आख्यातं स

विशेषणं वाक्यमित्युक्तं। तत्राख्यातशब्देन धातुरुच्यते सर्वमाख्यातजं नामेति सत्र तथा द

र्शनात्। तेन देवदत्तेन शायितव्यमित्यादावेनाव्याप्तिः॥ तत्रैवोत्तरभाष्ये एकतिङ् वाक्यमि राम

ति लक्षणमुक्तं तत्तु तिङ् समानाधिकरणे प्रथमेति न्यासे सर्वत्र तिङ् सामानाधिकरण्य ८५

स्यविद्यमानत्वात्व्यापकत्वाद्देवदत्तेनशायितव्यमित्यादावस्तिपदाध्याहारोगौरवबोधात्स्वै

त्तिङन्तार्थमुख्यविशेष्यत्वस्यब्रूहिब्रूहिदेवदत्तेत्यादावपिसत्त्वाच्छेदनेवादर्त्तव्यमितिस्व

चयितुमुत्तरग्रन्थोपादानं॥मीमांसकैरप्यर्थैकत्वादेकंवाक्यंसाकांक्षंचेद्विभागेस्यादि

त्युक्तं।व्याख्यातंचार्थैकत्वान्नावनेकत्वादिति।नचदेवदत्तोभुङ्क्तेयज्ञदत्तश्चेत्यादावप्ये

कवाक्यत्वापत्तिः।एकतिङन्तार्थमुख्यविशेष्यत्वस्यसत्त्वादितिवाच्यं।कारकभेदेनक्रिया

भेदस्वीकारात्।तार्किकैस्तुअर्थैकत्वात्प्रयोजनैकत्वादितिव्याख्यातं।एवंचप्रत्यक्षानुमा

नयोरप्येकवाक्यत्वेप्रमाणनिरूपणारूपप्रयोजनैकत्वात्तदुक्तं।तत्तुअर्थैकत्वादिति

किंसोनेत्तेसदनंकरोमिघटस्यधारयामुशेवंकल्पयामितस्मिन्नीदंव्रीहीणामेदःसु

तनस्यमानइत्यनेनविरुद्धं।तथाहिप्रत्यक्षस्यानुमानानपेक्षत्वेपिअनुमानस्य

प्रत्यक्षसापेक्षत्ववदिहसदनप्रतिपादकस्यमोदनप्रतिपादकानपेक्षत्वेपिसादनप्र

तर्कचंद्र तिपादकस्यसदन्नप्रतिपादकस्यापेक्षात्वस्यतुल्यत्वंएवंचयद्दिनत्रैकवाक्यत्वंसंमतंनहित्र
त्रापिस्यात्‌यागसाधनरूपस्यप्रयोजनैकत्वस्यचात्रसत्वेन।उभयोस्तुल्यत्वात्‌।किंचप्रत्य
८६ क्षानुमानयोरार्थ्यांकंशाब्दंतुक्रियाकर्मतोरिवाशाब्दी।यद्येकवाक्यतास्यात्‌।वाक्यार्थव
86 धेतस्याएवनियामकत्वात्‌।यदिस्वतंत्रेच्छातर्हिपचत्यंगातिमत्तत्तदेकंवाक्यमितिवक्तुमु
चितंनतुयत्किंचित्स्वार्थमयोनंतादृशैकवाक्यत्वेफलाभावाच्चत्वंपठतवप्रतिष्ठाभविष्यती
त्यत्रप्रतिष्ठारूपप्रयोजनैकत्वादेकवाक्यत्वेतत्रादेशापत्तेश्चेतिदिक्‌।कोशेतुतिङ्सुबंतचयो
वाक्यंक्रियावाकारकान्वितेतिवाक्यलक्षणमुक्तं।तत्राद्येतिङंताध्याहारेणैवसर्वत्रवोधोद्वितीयं
तुतंविनापिवोधेइतिविवेकः।।शब्देन्दुशेखरेतुतिङंतचयःसुबंतचयःतिङ्सुबंतचयःवा।श
वृक्षेदर्शीयपचतिभवतिदेवदत्तेनशयितव्यंचैत्रःपचतीतियथाक्रममुदाहरणानि।इदंतुलो
किकैकवाक्यलक्षणं।शास्त्रीयैकवाक्यलक्षणंत्वेकतिङ्वाक्यमित्युक्तं।तत्रशास्त्रीयेऽणैवनि राम
र्वाहेलौकिकेफलाभावात्‌।तिङंतेसर्वत्रक्रियापासत्वेनक्रियाचेत्कारकान्वितेत्यस्यवैयर्थ्यं। ८६

पतेश्वा। प्रहृतिप्रस्य प्रसमुदायेषु च तीत्यादौ लौकिके कवाकात्ता याः सर्वसंमतत्वेन भवदीत्या
तिङः सुबंतत्व याभावात्तत्राप्याप्ता पतेश्वा। आद्यमिक द्विर्वचनस्य सिद्धिः प्रयोगपक्षे लुनीहि
लुनीहीत्येवायं लुनातीत्यादौ निपातप्रतिषेधार्थमतिङः ग्रहणमस्य सार्थकमाख्येतस्य सा
र्थ्यानंवार्तिकाशयवर्णेन मात्रेन तु तत्राग्रहः। सामंत्रितं॥ संबोधने चेति प्रतिप्रथमाप
दं चानुवर्तते। तेन संबोधने विहितप्रथमांतमामंत्रितसंज्ञमिति सूत्रार्थः॥ तथा चात्र
सकारग्रहणं मास्तु। न चात्र संज्ञाविधित्वात्तदंतविधिनेति वाच्यं। महासंज्ञाकरणेन संज्ञा
विधावप्यस्य प्रवृत्तेः॥ न फलाभावः। हे हे भो इत्यादौ नांतत्विसिद्धेः फलत्वात्। अन्यथा नख
नि भिन्न्यत्र भिस्यभावावदत्र प्रथमाभावादामंत्रितसंज्ञा न स्यात्। समः समि। समनोनि
ङः समङ् इति वा सुबंत्वं। तिरसस्तिर्यलोपे। अत्रालोपे इति मास्तु। न च तिरश्चेत्यत्र स्यादि
ति वाच्यं। अकारतकारयोर्लोपः च कारमात्रस्याचतित्वाभावात्। नवीनरीत्या इर्द्धिक
विकारस्यैकदेशविकृतन्यायस्याप्रवृत्तेः॥ अस्मदादीनेकदेशविकृतन्यायनाचलेपि अंच

इ समः समीति विधाने अकृत्वा निषेधाय यथास्यादित्यनन्मर्थमिति चिंत्यमेतत्

तर्कचंद्रिक तिपदस्यतंत्रादिनाजाद्यंतोपरेद्वातेव्याप्तेनेनदोषाभावात्। यद्वात्तिरसत्तिर्यंचातिन्यासःका
८० र्यः पूर्वोक्तरवार्थः। नत्त्रौपात्स्वं भवति यदि देशो ऽजादित्वमस्त्वेवेतिवाच्यं। अव्यक्तरूह प
87 रिभाषयातत्राप्रवृत्तेः॥ नचाचः परस्मिन्निति स्थानिवत्त्वं। अचाहणसामर्थ्येनाचः परस्मि
न्नित्यस्याप्रवृत्तेः। यद्वाचिचकारादिभिन्नेचत्ताविमर्थः। तथाचास्मिन्न्यासेनकोपिदोषः
॥ यद्वात्तिरसत्तिर्यंत्रोभसंज्ञारहितेचत्ताविमर्थः। यद्वात्तिरसोचिविड्ढ्इतिन्यासेमात्राला
घवसत्त्वेपिद्वित्वसामर्थ्यात्प्रयत्नाधिक्यमितिनिष्कर्षः॥ किंचयथान्यासेतिर्येचमाचष्टेतिणयप
त्तीसादौटिलोपेनांचत्तेलुप्तत्वेनलोपरहितांचतित्वाभावादव्याप्तिः। तदर्थंशकंध्वादिपर
रूपेणालुप्ताकारेंचात्ताविति व्याख्याने क्लेशः। अलंसंतस्याबाधातोः॥ अंगविशेषणत्त
यात्तदंतविधौसिद्धेतद्ग्रहणमत्तमात्रेदीर्घो यथास्यादितिसेत्तदर्थांत्तेनगोमानितिसादीर्घः सि
ध्यति। अन्यथोपदेशेक्तवत्तोरेवालेतत्वात्तत्रैवैदीर्घस्यात्ततुमतुपः॥ तस्योपदेशोऽग्रयो राम·
गेवालेतत्वाभावात्। एतेनांगविशेषणत्तयार्थसिद्धेतदंतविधेरनुवादकमंतग्रहणमिति ८७

शाब्दं दृशोरवरोक्तमप्यास्तां॥ अनुबन्धानेकान्ताइत्यपद्धेवायोऽर्थं॥ अदस औ सुलोपश्च॥ अ
दसो ओरिस्यादुत्वं तु मुचितं सदा दीनामइत्यत्र विभक्ताविति विषयसप्तमीस्वीकाराद्धि
त्रकैः पूर्वमत्वे एकादेशे टिलोपस्यासाविलस्य सिद्धत्वात्॥ एतेन नन्वसौ औ इत्येवास्त्विति
चेन्न॥ असाविलत्रटिलोपे कृते निमित्तत्वात्सत्वं बाधित्वात्वदापत्तेः सावित्यस्य सिद्धिरिति
तदोः सः सावनन्त्ययोरित्यतः सः सावित्यनुवर्तते तेन सकारोप्यनेन विधीयते तथा
च रूपसिद्धेः स्पष्टत्वात्॥ परं तु अस्मिन्सूत्रे दस इत्यस्य पञ्चमीत्वं षष्ठीत्वं सावि
त्यस्य षष्ठीत्वं सप्तमीत्वं च कल्प्यमिति गौरवं॥ यत्तु नन्वसौ रेवोत्वं विधीयतां सदाप
त्वेनासाविति सिद्धं किं सुलोपविधानेनेति मैवं॥ असकौ इत्यत्रापि प्रसंगस्यादि
ति लघु संगादिति मनोरमा॥ प्रतीकमुपादाय तत्र चैत्वविधायके आ आविति मनसा स्पष्ट
निर्देशान्नेत्वं॥ कारिकेत्यादावप्यात्वानापत्तेः॥ तस्मात्स्पष्टनिर्देशो नात्रेत्येव माध्व

तर्कचंद्रिका स्पृष्टं। एतेन सदा नाम इत्यत्र अविभक्त्या विभक्त्यास्य विषयसप्तमीत्वमपास्तं। एवं हि विभक्त्युत्
तेः पूर्वं सदा पदेनापि सामा इदमर्थस्य स्योल्लेपि स्थानिवत्त्वेनालान्निर्द्दिष्ट परिभाषया अस
त्वां विषयसप्तम्या वक्तुमशक्यत्वाच्चेति दिक्। इदमेतेन विषयसप्तमीत्वं खंडनं शब्दरत्ने
दूषितं। तत्तु मदुक्तन्यासे गर्भस्वावितैव गतमिति दिक्।। गोवर्द्धनभट्टात्मज रघुनाथ सूनुत
मो निश्रीकृष्णभट्टकृततर्कचंद्रिकायां हलंतपुंल्लिंगं समाप्तं।। अयोभिः।। अत्र प्रमाणा
प्रकारोत्तरपदशब्दस्य ग्रहणं।। तेन प्रत्ययग्रहणं न तत्र प्रकारस्य लुप्तत्वेनाप्रत्ययस्य तर्केंद्र गोत्र
रत्वात्। स्पृष्टं चेदं दाधवदाविति सूत्रे। एतेनाविति प्रत्ययो न गृह्यते आद्यन्तादिति शब्दे
दुशेस्वरोक्तमपास्तं। प्रत्ययग्रहणपरिभाषया प्रत्ययस्यैव ग्रहणापत्तेः।। छ।। इति हलं
ताः स्त्रीलिंगाः।। छ।। नैकर्त्तव्यं। समासेपि एवमेनदादेशो बाधकाभावः। सनारमायां तु
दृष्यावकृताः द्वितीयाटौस्वेनतत्वात्। तोत्तोपमादेशः। तत्सामर्थ्यान्नपुंसके लुकालुप्तेपि प्रव राम०
र्त्तते। एवं च वार्त्तिकमेतेन द्विधा पक्षे न कर्त्तव्यं। समासेपि एवमेनदादेशो बाधकाभावः। स

प्रातिपदिकार्थेस्यादिसूत्रेलिंगग्रहणात्तस्मिन्नस्याः प्रातिपदिकार्थएवतदंतर्भावेनपृथक्कृतदूषणा
नानुपपत्तेः। किंचस्त्रीप्रत्ययाःस्त्रियाः भार्यात्वेनविशेष्यतयाबोधयतिरुद्राण्यादौ। भार्यात्वसं
बंधविशेषः। तत्रैवानुरूपकत्वेनप्रकृत्यर्थान्वयः स्त्रीत्वंयोनिमत्त्वं। खट्वादेवदत्तादिपदे च
स्त्रीप्रत्ययानार्थबोधकाः। तत्रप्रकृत्यर्थयोनिमत्त्वस्त्रीत्वस्यायोग्यतयानन्वयादित्याहुर्गदा
धरादयः। तन्न। श्रीः इत्यादौ स्त्रीप्रत्ययाभावेपि स्त्रीत्वस्यप्रातिपदिकमात्रादपिप्रतीतेस्तस्या
पिस्त्रीत्वार्थकत्वंप्रत्ययस्यचेतिविनिगमनाविरहात् गौरवापत्तेः। किंचस्त्रीप्रत्ययादीनांस्त्रीत्वार्थकत्वे
णचस्त्रियामजितिस्त्रियामजिविहितेव्याक्रोशीत्यादावुक्तार्थानामप्रयोग इति ङीषनस्या
त्। द्योतकेषुतुनैवंव्यतिलुनीतेत्यादौ द्योतकसमुच्चयस्यादुष्टत्वात्। अपिचाजेत्यादौ स्त्रीत्व
स्यप्रकृत्यर्थविशेषणत्वेनान्वयोनस्यात्। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यप्राधान्यात्
नचेष्टापत्तिः। तद्वादयःविशेषणतयाबोधतीतिस्वग्रंथविरोधात्। स्त्रीत्वविशिष्टाजेत्यनुभ
वविरोधाच्च। लिंगग्रहणमप्यस्याद्द्योतकत्वेनतस्यवाचकत्वसाधकोपन्यासवैयर्थ्यमिति चेत्। यदपि
रुद्राण्यादौभार्यात्वेनबोध इत्युक्तं। तदपिन। नहितत्रभार्यात्वेनैवबोधः। अपितुकन्यात्वेनापिपुं

तर्कचंद्रि

९०

90

योगस्योभयत्राविशेषात्॥ शास्त्रीयं प्रतिलिंगशास्त्रबोधेन गम्यते न तूपस्थितत्वात्। एवं च लौकिकमे
व लिंगं शास्त्रबोधेन गम्यते न तु शास्त्रीयमिति तार्किकानां दुराग्रहमात्रं तस्यापि बोधे बाधकाभा
वात् पंचाजीति। न चात्र प्रत्ययविधित्वेन ग्रहणवत्ता प्रातिपदिकेनेत्यनेन च तदंतविधेः प्रतिषेधा
त्कथं टापः प्राप्तिरिति वाच्यं। अमहत्पूर्वग्रहणेनानुपसर्जनाधिकारेण च येन विधिरित्यस्यानि
त्यत्वज्ञापनेनानयोरभावस्य प्रवृत्तेरनुपपन्नत्वात्। एतेन महत्पूर्वग्रहणेनानुपसर्जनाधि
कारेण च स्त्रीप्रत्यये तदंतविधिर्ज्ञाप्यत इति मनोरमाग्रंथः। तच्चाहस्मात। एतद्ग्रंथस्यापास्तः
॥ प्रत्ययविधौ प्रतिषेध इत्यस्य स्वबाधेनाग्रहणप्रातिपदिकेत्यस्य चरितार्थत्वेन ग्रहणवत्तेस
स्वबाधे मानाभावात्॥ युक्तं च तदंतविधिरनित्यत्वेन न तु स्त्रीप्रत्यये तदंतविधिः। गुणितां ह
णस्य व्यर्थतापत्तेः। स्त्रीप्रत्ययेनैव तदंतविधेः सिद्धत्वात्। किं चाजादिभिः स्त्रीत्वस्य विशेष
णान्नेहेति मूलं पारव्यानानामिति संयामि त्वेतदजादीनां विशेषणमिति तत्पाठव्याख्यानेनाप्युक्तं। बा
धकस्य बाधसमानविषयत्वे पंचाजीत्यत्र विशिष्टस्य जातित्वाभावाट्टापः प्राप्तेरभावा राम:
त्। न त्वेवं मजस्य स्त्री अजीति स्यादिति चेन्न। अदंतस्य स्त्री अदंतीति वादिष्टापत्तेः। अत एव अद ॐ

द्वाचामहल्पूर्वा जातिरित्यत्र जातिरिति व्यर्थो मुख्ये कार्यसंभवाज्जातिवाचकस्यैव ग्रहणात्पुंयो
गेऽगवृत्वाद्व इति मनोरमायामुक्तम्। यत्तु शब्दरत्ने ऽपुंयोगे ऽज्ञेत्येव भवितव्यं गौणमुख्यन्यायश्च प
दकार्यविषय एवं च श्रद्वाचामहल्पूर्वा जातिरित्यत्र जातिरित्यावश्यकमिति ध्येयमिति मनोर
मादूषितम्। तत्तु न सम्यक्। विशिष्टरूपोपादाने गौणमुख्यन्यायप्रवृत्तेः। प्रपिधम्प्राप्तिर्द्विरू
लकोहि स न्यायः। स्पष्टं चेदं मोत्तरसूत्रे भाष्यकौस्तुभादिग्रंथेषु॥ किंच गौणमुख्यन्या
यः पदकार्यविषये न प्रातिपदिककार्ये इत्यत्र मानाभावः। फलाभावश्च॥ पादोऽन्यतरस्या
॥ अत्र द्विपदी द्विपादित्ती प्यत्ते न तु द्विपदेति। उत्तरसूत्रे द्विपदेत्ती प्यत्ते न तु द्विपदी द्विपादि
ति। एतच्च यथान्यासेन सिध्यति। पादः पत् यो यं पदशब्द आश्रित्य टापि द्विपदेत्यस्याप्यापत्तेः
। किं पिपादिति प्याप्यत्तिः न चोत्तरसूत्रे एतस्य ऋचवाचकत्वाभावेनासंभवात्तदनुरोधेन
पूर्वत्रापि तस्याग्रहणमिति वाच्यं। असंजातविरोधित्वेन पूर्ववाक्यार्थानपवृत्ते पि दोषस्तत
दवस्थत्वात्। किंचित्वत्पत्वाक्येन पूर्ववाक्यार्थनिर्णयो दृश्यते। स त गतिकगतिकः॥ गौणमु

तर्कचंद्रि एवमन्यायेन लक्षणप्रतिपदोक्तपरिभाषया वा न निर्वाहः। उभयोस्तुल्यत्वात्। मन्मतं तु प्रतिभा
६१ तिपदादित्येकं सूत्रं कैवल्यमास्तीति लिङ्गं। अन्यतरस्यांग्रहणं भाष्ये तु। पदशब्दात् ङीपि द्विपदी
१। पाद् इ रूपद्वयसिद्धिरिति। स्यासिद्धत्वात्। एवं चानचि द्विपदेत्यस्य प्रशंकैव नास्तीति लाघवं न
चैवं केवलाविवक्षा। टाबृचीत्यनेन टाप्येकपदेत्यादिसिद्धावपि याच्ववृस्येकपादि
त्यपि स्यादिति वाच्यं। टाबृचीत्यनन्तरं पाद इत्यपि सूत्रकरणेन पादद्वादपि टाप्प्रत्ययान्ता
तापत्तुल्यत्तसमासांत इति केषुदाप्रतीकमुपादायोत्तरसूत्रे कच्छभिधेयायांतस्यैव
संभवेनार्थाधिकारानुरोधादिति भावः। तेन पादपतेः किं वं तस्य ग्रहणं नाद्विपदी
ति। द्वौ पादाववस्या इति बहुव्रीहौ संख्यासुपूर्वस्येति पादशब्दांतलोपस्ततो ङीपि पादः पत्। ता
दृचि। पूर्वसूत्रप्राप्तङीपोपवाद इति प्राञ्चः। तच्चिंत्यं शेषाद्विभाषेति सूत्रस्य भाष्यविरोधा राम.
त्। तत्र हि प्रतिपदविहितसमासान्तानां कपोऽवेकल्पिकत्वेन कबभावे सावकाशत्वमुक्तं। तद्वी ६१

त्वात्स्यापि पूर्वसूत्रस्य वैकल्पिकत्वेन तदभावे सावकाशत्वात्। बहुव्रीहेरूधसो ङीषित्यत्रापि
भाष्ये स्पष्टमेतत्। अत एव ङ्याप्प्रातिपदिकादिति सूत्रे पादः पाद्भवति समानार्थमकारान्तपदशब्दा
द्ङीषं नेगीकृतेत्यत्र व्याख्यातं। उच्यते च छंदसि तत्स्याः समानार्थे के पदा एकपाद इति च भा
ष्योक्तं संगच्छते। तदा हि न चापि एकपदी एकपादिती ष्यत एव एवं चैकपादृगिति स्यादिसूत्रम
ते सिद्धे टाबृचीत्यत्राप्यन्यतरस्यांग्रहणमनुवर्त्त्य पादित्यत्र [illegible] चानभिधानमिति तु न भा
ष्याशयः॥ ङीर्वतप्रयोगस्य सूत्रमते [illegible] ष्यासिध्यापत्तेरिति बोध्यं॥ केवलपा [illegible]
स्त्रियां [illegible] विचासंभवेनात्र तदंतविधिरिति शब्देन्दुशेखरे उक्तं न व्यैः। तेन सूत्रमते विप्रतिषे
धे परत्वेन ङीपं बाधित्वा परत्वाट्टापि [illegible]। चैकपदे [illegible] लात् [illegible] पूर्वापवाद इति वद
तां सकलग्रन्थकाराणां संमतं चेदं तत्रापवादशब्दो विप्रतिषेधे न बाधकपरः॥ एवं च मनोर
मापि संगच्छंते इति। पदपि ङाप्सूत्रे टाबृचीति प्रत्याख्यातमित्युक्तं। तदपि न। तत्र हि आपाततो आ

प्रग्रहणप्रयोजनमात्रमुक्तं न तु सिद्धान्तस्थितिः प्रयत्नेन सूत्रप्रत्याख्यानं च व्यापित्वमत्र प्रमि
तिभवद्दुक्तं संगच्छेत । उत्तरग्रन्थे श्रा प्रग्रहणस्यान्यार्थताया उक्तत्वात् वस्तुतस्तु तद्धाच्यं पूर्वो
क्तमदुक्तार्थस्यैव साधकं । तथा हि । पद्दात् । द्विपदी पादस्य तु द्विपात् । एवं च रूपद्वयसिद्धौ अन्य
तरस्याग्रहणं व्यर्थं । ताद्वचोत्पन्ने तु पादोताद्वचीति पाद्यं ति न पदशब्दात् पादशब्दाद्वापि क्वचे
कपदे त्वेकमेव रूपं सकलसंमतं न तु नवीनोक्तरूपत्रयमिति दिक् ॥ प्राचां ष्फ तद्धितः ॥ ननु
वर्तं उत्पन्न वर्तं उच्चेति प्रश्नः स्युकुस्त्रियामिति लुकि प्रत्ययलक्षणतो न यत्नं तत्त्वात् ष्फः प्राप्नो
तीति चेन्न । ष्फविधावत इत्यनुवृत्त्यावर्णाश्रयत्वेन प्रत्ययलक्षणाप्रवृत्तेः ॥ नन्वत्र तद्धित
ग्रहणं मास्तु यूनः या ताऽणीत्यत्र सवर्णदीर्घेणेव सिद्धेरिति चेत्तत्तस्य बाध्यवचिदिवं तादृशणिष्फो भव
तीति ज्ञापनार्थत्वात् । तेनासुरेरूपसंख्यानमिति सिद्धिः ॥ वस्तुतस्तु अत्राधिकारार्थं तद्धित
ग्रहणं तेन तद्धिताः इति अधिकारसूत्रं मास्तु । न चोत्तरसूत्रज्ञापकतानस्यादिति वाच्यं । अन्यत्र कार्तं

मेऽग्रहकरणेन तत्संभवात् । नन्वेवमप्युपित्तद्धितत्वात्कुरूपिरसंज्ञोर्गुणापत्तिरिति चेन्न । यस्येतिवोर्च्यांक्र
त्येकारस्य ग्रहणेनादेशानिल्काजादिस्त्रीप्रत्ययस्य संज्ञा नेति ज्ञापितत्वात् । टिघुभादिवत्तद्धितेत्येव संज्ञा
यो कर्तव्यायां महासंज्ञाकरणेन तेभ्यः प्रयोगेभ्यो हितास्तद्धिता इत्यन्वर्थसंज्ञावलेनापि सिद्धत्वा
च्चोष्यः प्रत्ययस्यात्तुयत्तु दुष्यः प्रत्ययस्येत्येकयोगे कर्त्तव्ये योगविभागकरणं चुटू इत्यस्यानित्यत्व
ज्ञापनार्थमिति नवीनाः । तन्न । यकारप्रश्लेषपरभाष्यविरोधात् । वस्तुतस्तु इदं व्यर्थं चुटू इत्य
त्र चुष इति सूत्रे कर्त्तव्यं । न च षोडशी स्याहावपि लोपापत्तिः । उपदेशग्रहणेन तन्निरासात् ॥ उद्दे
शश्च प्रातिपदिकानां नोपदेश इति भाष्ये सातेषामनुपदेशाभावात् । प्रातिपदिकानामुपदेशः क
तेऽष्टु इति भाष्यं तु न वस्तुभवस्यापकं । तथा ग्रहे श्वेज्ञाक्षिसादयः षडिति निर्देशात्प्रत्ययाति
रिक्ते प्रवृत्तिः । उणादेस्तद्धिते इत्यत्र तु पर्युदासेन प्रसज्यलाभः ॥ इति श्रीमन्मौनिकुलतिलकाय
मानगौवर्द्धनभट्टात्मजजानकीजानिरघुनाथ्या । भट्टात्मजश्रीकृष्णभट्टविरचितायां तर्कचंद्रिका

तर्कचंद्रि यांस्त्रीप्रत्ययाः॥ ॥छ॥ ॥छ॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा॥ प्रातिपदिकार्थमा
९३ त्रे। उच्चैः। नीचैः। हरिः। श्रीः। ज्ञानं। अत्र लिंगस्य नियतोपस्थितिकत्वेन प्रातिपदिकार्थत्वात्। [illegible]इत्य
९३ नुदाहरणं। वासुदेवस्य नियतलिंगत्वेपि प्रातिपदिकस्यार्थस्यानियतलिंगत्वानपायात्। नील
रूपवत्त्वसंपन्नमिति डायोगस्य साधुत्वं न कर्मधारयान्मत्वर्थीय इति निषेधात्। न च प्रत्ययस्था
दिति सूत्रस्थेन नासुवत इति भाष्यप्रयोगेण कर्मधारयान्मत्वर्थीयस्य साधुत्वमिति मन्तव्यं। तस
मर्थेन शब्देन लोके सम्यक्॥ आर्षप्रयोगाणां तु साधुत्वेपि अस्मदादिकृतप्रयोगस्यापि साधुत्वे स्वा
यत्तशब्दप्रयोग इति न्यायविरोधात्। अन्यथा न कर्मधारयादिति सूत्रस्य निर्विषयतापत्तेः। नञ्समा
सस्य कर्मधारयत्वाभावेन नासुवत इति भाष्यस्य साधुत्वेन ज्ञापकाभावाच्च। अत्र त्रिकं प्रातिपदिका
र्थः॥ अनियतलिंगस्य त्वेहि द्विकं प्रातिपदिकार्थः। तटः तटी तटं इत्यादौ तत्र लिंगग्रहणात्सिद्धिः। इस
म्मिन्प्रायेण सूत्रकारेण लिंगग्रहणं कृतं। यद्दितु नियमो भ्रान्तो येन प्रातिपदिकेन हरणावबोध्यत्वमेव राम०
९३

प्रातिपदार्थत्वं लिंगं च प्रातिपदिकार्थ इति पक्षे तद्वा लिंगेति मास्तु ॥ परिमाणमात्रे द्रोणो व्रीहिः
अत्र प्रातिपदिकार्थो द्रव्यं परिमाणं गुणाः स्वस्य पार्थः । तयोश्च संख्याश्रयिभावेनान्वयः । त
था च द्रोणाश्रिते यत्परिमाणं तत्परिच्छिन्नो व्रीहिरिति बोधः ॥ द्रोणरूपं यत्परिमाणमिति
त्वयुक्तमेव । गुणगुणिनोस्तादात्म्यायोगात् । तयोस्तादात्म्यमिति मतेन घटो द्रव्यमिति व
त्सामान्यविशेषभावेन वा यथाकथंचिद्बोध्यं ॥ यदि तु परिमाणस्य प्रातिपदिकार्थत्वं स्वी
कृत्य प्रातिपदिकार्थमात्रे प्रथमा क्रियेत तर्हि नामार्थयोरिति अभेदस्यादि सोहुः । तत्रेद
वक्तव्यं तत्रैव नामार्थयोरेवाभेदः नामार्थयोरभेद एव वा । नाद्यः वैश्वदेवीस्तोकं पचतीत्यादौ
व्यभिचारात् । नान्त्यः घटपटावित्यादौ व्यभिचारात् । तस्मात्कं भवति सामानाधिकरण्ये वै
यधिकरण्यस्यान्याय्यत्वमिति सेतन्मूलकत्वमेतस्य तथा च प्रकृते न कोपि दोषः ॥ ननु ए
वं द्रोणो व्रीहिमानयेति स्यादिति चेन्न । अभेदबोधव्युत्पत्त्यर्थे न परिमाणग्रहणेन यत्राभेद
बोधे उत्थिताकांक्षा तत्रैव प्रथमाविधानात् । यद्वा नामार्थयोः संसर्गतयाभेदसंबंधबोधेपि

समानविभक्तिकत्वतिंयामात्। एवं च परिमाणग्रहणं मास्तु पुत्र चैतत्॥ अन्यथा द्रोणो व्रीहि
परूपेत्यत्रमपबोधः स्यात्॥ यथा स्तुलक्षणया भेदसंबंधेनैव बोधः। न च प्रातिपदिका
र्थातिरिक्ताभेदसंबंधबोधात्प्रथमा न स्यादिति वाच्यं। वाक्यार्थः सः। तथा च सर्वत्राभेदसं
बंधस्य संसर्गतयैव भानं। नैव स्वस्वामिभावादिसंबंधस्यापि वाक्यार्थत्वात्प्रथमापत्तिः। त
स्य प्रकारतयैव शाब्दबोधनियमात्। तथा च संसर्गतयाभेदबोधे प्रथमा। प्रकारतया स्वा
स्वामिभावादिबोधे षष्ठीति विवेकः। एहोः शिरइत्यादौ तु संबंधस्य प्रकारतयैव भानं। शिलापु
त्रकस्य शरीरमितिवत्। स्य षष्ठं चेदमाद्येतवदेकस्मिन्निति सूत्रे भाष्ये। स्य षष्ठं चेदं प्रातिपदिक
थिषष्ठीशेषइति सूत्रयोः भाष्यो अन्यथोभयोरपि वाक्यार्थत्वे प्रथमाषष्ठ्योर्विषयविभागो
न स्यात्। ननु संबंधस्य भेदघटितत्वादभेदस्य संबंधत्वं कथमिति चेत्। अप्रुसंबंधत्वे स्वेतरा
थीन्वयित्वं। स च संबंधो द्विविधः। भेदोभेदश्चेति। अभेदसंबंधत्वं तु उपाध्येरसंकरत्वे सतितु राम.
पध्येयसंकरत्वे। उपध्येयासंकरत्वे सत्यन्वयित्वं भेदसंबंधत्वं॥ एवं च द्रोणो व्रीहिरित्यादौ लक्ष्य ९४

णायोपधेयसंकलत्वंबोध्यं॥ एतेनाभेदस्य संबंधत्वं नास्ति भेदघटितत्वात्संबंधस्य तथापि विशेषणा
विशेष्यभावो बोध्यः। अन्यथा षष्ठ्यापत्तेरित्यपास्तं॥ अभेदसंबंधातिरिक्तसंबंधे एव तेन षष्ठ्या न
चात्र मानाभावः। राहोः शिर इत्यादौ वा पाधिकभेदप्रतीतिवदेकभाष्यस्यैव मानत्वाच्च। किंच विशेष्या
भावेनान्वय एवाभेदसंबंधः स च घटो घट इत्यादौ समानोपाधिके बाधितोपि नीलमुत्पलमि
त्यादौ स्वीक्रियते संबंधत्वं तस्य न स्वीयते इति दुराग्रहमात्रं। लाघवगौरवाभावात्। अर्थप्रथमेसे
वस्मारमिति प्रपश्चितः। वार्तिककारेण तु अभिहिते प्रथमेत्युक्तं भाष्ये तु तद्दूषितं। प्रासादे आस्ते
इत्यत्र घञाधिकरणस्योक्तत्वात्प्रथमापत्तेरिति। तत्कोटिवादमात्रं। प्रधानक्रियानिरूपितान
भिहिताधिकरणत्वस्य सत्वात्सप्तम्युपपत्तेः॥ अस्तु वा तिङुक्ते प्रथमा। एवं चानभिहिताधिकारोपि
न कर्त्तव्य इति महल्लाघवं। न च प्रानंदः औपगवः कर्त्तेत्यादौ समासतद्धितकृद्भिरभिधाने तिङुक्त
त्वाभावात्प्रथमा न स्यादिति वाच्यं। तत्रापि अस्तिर्भवन्तिपर इत्यनेन तिङंताध्याहारेणैव बोधात्तिङ
क्तत्वसत्वात्॥ एवं च राज्ञः पुरुषोस्तीत्यादौ पुरुषनिष्ठकर्तृत्वस्य तिङोक्तत्वात्पुरुषपदादेव प्रथमा न
तु राजपदात्संबंधस्य निपत्वेपि प्रतियोगिन एव षष्ठ्यानाकृयोगिनः प्रथमप्राप्यबाधादित्यपरम

नुकूलं॥ अथ वा प्रथमेत्येव सूत्रमस्तु॥ अनिर्द्दिष्टार्थास्वार्थेत्तार्थे इति प्रातिपदिकार्थे मवि
ष्यति। स्यपं चेदं विनश्यांनानामौ सहेत सूत्रभाष्ये॥ उक्तविभक्त्यर्थातिरिक्तः शेषस्तत्र षष्ठीति
सूत्रार्थात्त्वषष्ठी शेषे इत्यत्रापि न दोषः॥ संख्यासंबोधनातिरिक्तार्थानभिधायकत्वे सति प्रातिप
दिकार्थबोधकविभक्तित्वं प्रथमात्वं यद्वा सुवादित्रिकान्यतमत्वं प्रथमात्वं॥ संबोधने चास्यां सं
बोधने च वक्तुरिच्छाविषयं प्रकृत्यर्थसमवेतं प्रकृतशब्दजन्यं ज्ञानं। तथा च वक्तुरिच्छाविषयरा
मसमवेतज्ञानविषयं मत्कर्मकं रक्षणमिति बोधः॥ तार्किकास्तु वक्तुरव्यवहितशब्दजन्यबोधा
श्रयत्वेनेच्छा प्रथमार्थः॥ तादृशेच्छायाः विषयतासंबंधेन प्रकृत्यर्थविशेषणतया भानं। तथा च व
क्तुरव्यवहितशब्दजन्यबोधाश्रयजन्यत्वावच्छिन्नाश्रयत्वेनेच्छाविषयो राम इति बोधः॥ संबोध्यत्वं च सम
वायसंबंधेन वक्तुरिच्छाविषयप्रकृत्यर्थसमवेतप्रकृतशब्दजन्यज्ञानाश्रयत्वमिति वदंति। तन्न
संबोधनपदार्थाभावात्॥ यत्तु वैयाकरणा नव्याः संबोधनमभिमुखीकृत्य ज्ञातार्थज्ञानानुकूल
व्यापारानुकूलव्यापारः। तद्व्यापाराजन्यज्ञानानुकूलव्यापाराश्रयत्वं संबोध्यत्वं। राम त्रायस्व

तिरामसंबोधनविषयस्त्रायामितिबोधः। अभिमुखीकरणं च स्ववचनार्थग्रहणोन्मादरत्वकरणं
तस्मै जकं च मुखयराहेत्यादौ त्याहुः॥ तत्र असन्निहितचेहोदृविवीरामभवेत्यादौ तदसंभवात्। अत्रम
ध्यमपुरुषस्तु युष्मच्छब्दोध्याहारेण॥ ननु भोः शालग्रामे चैत्रो गच्छती त्यादिवत् भो शालग्रामं त्वंप
चेत्यापत्तिरिति चेन्न। यद्दादौ नापरामृश्यमानसमानवचनत्वनियमात्। ननु अकांडशूलि
निर्भिन्नेवत्से जहति चेतनो। हतामरारामकस्यार्थं दग्धजीवितुमिष्टसीत्यादौ वक्तसंबोध्ययोर
कत्वेन मदुक्तताकार्थज्ञानसत्वात् किंतु वक्तुरिच्छाविरहाद्रामस्य संबोध्यत्वानुपपत्तिरिति चेन्न।
आत्मानमात्मनावेत्सीत्यादाविव लक्षणया विशेषरामप्रतिष्ठितलक्षणविशिष्टरामयोर्भेदेन
संबोध्यत्वसंभवात्। ननु तिङैव प्रथमांत संख्याभिधाने प्रथमायाः संख्यावचकत्वं किमर्थ
मिति चेन्न। चैत्रो मैत्रश्च गच्छत इत्यादावाख्यातोपात्तद्वित्वविरुद्धैकत्वसंख्याबोधाततदावश्य
कत्वात्। प्रथमा चाकारकविभक्तिः॥ कारविभक्तित्वं कारकाधिकारपठितकर्तृकर्मादिसंज्ञामु
पजीव्य विधीयमानविभक्तित्वं। क्रियान्वितविभक्तित्वं तु नवैय्याकरणोगच्छति सुहृदधियाविश्या

गोर्के चेद्रि ९६

96

दौ पणाद्यापत्तेः। न च सहयुक्तेऽप्रधाने इति सूत्रे भाष्ये ऽप्रधानग्रहणं प्रत्याख्याय प्रधानात्तृतीया
पत्तिमाशंक्योपपदविभक्तेः कारकविभक्तिर्बलीयसीत्युक्तं। तत्तु क्रियान्वितविभक्तित्वपक्षे ए
व संगच्छत इति वाच्यं॥ तत्र कारकशब्दस्यांतरंगपरत्वात्। अन्यथा शिष्येण सहोपाध्या
यस्य गौरित्यत्रोपाध्यायस्यागम्यन्वितत्वेनाक्रियान्वयाभावेनोपपदस्येत्यस्याप्रवृत्त्या तृतीयाप
त्तेः। एवं पुत्रेण सहोपाध्यायस्य स्थौल्यमित्यत्र गुणेनान्वयेपि॥ एवं च भाष्याशयमबुध्यायथा
क्षेरमात्रं दृष्टे। तेन प्रथमायामपि कारकत्वमिति भ्राम्यंत सकलग्रंथविरोधादुपेक्ष्याः॥ इति
प्रथमा॥ कर्तुरीप्सिततमं कर्म॥ ननु कर्त्रीतज्जन्यफलेन क्रियया संबद्धुमिष्यमाणस्य कर्मत्व
मिति सूत्रार्थः। तथा च पितुः स्वर्गोद्देशेन ब्रह्मगोदाने पितुरपि कर्मत्वापत्तिः। न चेष्टत्वमर्थो नवच्छे
दकमिति वाच्यं। सूत्रे तदनुल्लेखात्। तस्मादिष्टत्वमर्थफलशालिकर्मेति सूत्रमस्तु। एवं च तथायु
क्तं चानीप्सितमिति न कर्मत्वमिति महद्भाष्यं। न चाग्नौ मीणकेवारपतीत्यादौ माणवकस्यानना
प्याद्दत्वात्कर्मत्वं वाधितलापादानत्वं स्यादिति वाच्यं। धात्वर्थफलानधिकरणस्यादौ चेरितार्थ

त्वेनापादानमुत्तरात्तिगोंदोग्धिदुग्धस्तत्रैवापादानं वाधितत्वात्परत्वात्कर्मत्वोपपत्तेः॥ धात्वर्थस्तु प्रवृत्तिध्वं
सानुकूलो व्यापारः॥ भाष्ये स्वतन्त्रमताख्यातेन दोषाभावाच्च॥ एतेन धातूपस्थाप्येत्याद्यावुभयकर्ता
दिसंतः मनोऽस्माग्रेथश्वग्रेरिति प्रतीकमुपादायेप्सिततमपदाभावे वारणार्थानामित्यस्यैतदपवा
दत्वापत्तेः। न चाग्नेस्तत्त्वारितायात स्थापितदुपस्थाप्यफलयोगरूपफलाश्रयत्वात्। वारयतेश्च सं
योगाद्यनुकूलव्यापाराभावानुकूलव्यापारोऽर्थः। तत्रापीप्सितशब्दः क्रियाशब्द एवाईप्सिततमपि
त्युक्तावीप्सितमात्रस्यावकाशस्य परत्वादीप्सिततमेन वाधः। ईप्सिततमत्वं च प्रकृतधात्वर्थप्र
धानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वं। अत एवाग्रेर्दृष्टत्वप्रतीतिस्तत्रेति भाव
इत्यन्तस्तद्व्याख्यात्। ग्रंथस्थापास्तसंयोगस्य फलकोटौ निवेशो गौरवात्॥ एवं निष्ठगोसंयोगा
द्यनुकूलगोमार्गपतित्वरूपव्यापाराभावानुकूलव्यापारविवक्षायां यवप्रतियोगिकगोऽनुयोगि
कसंवंधस्तलाघवान् गोभ्यो वारयतीति प्रयोगापत्तेश्च। प्रवृत्तिध्वंसस्य धात्वर्थत्वे तु तस्याग्नेतनि
ष्ठत्वान्नतादृशप्रयोगः। वच्छेदकत्वन्लाघवाद्धातेत्वस्यैव प्रवृत्तित्वस्य लघुधर्मस्याभावप्रतियोगि

तर्कचंद्रिक त्वसंमवेतसंयोगाद्यनुकूलव्यापारत्वस्य गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वात्। यद्वोद्देश्याभावा
९७ नुकूलव्यापारो वा रयेतरर्थः। इष्टाभावानेलाघवानुकूलव्यापारो वा॥ ५ एवं च प्रवृत्तिर्न संयोग
97 द्यनुकूलव्यापारश्च पितु ह्र तित्ववज्जातिविशेषः। अखण्डोपाधिर्वा। तथा च + अत्र कारके इ
त्यधिकाराद्ब्राह्मणस्य पुत्रं पथानं पृच्छतीत्यादौ वकथितं चेत्यनेन ब्राह्मणस्य पुत्रविशेष
णत्वेन क्रियायामभावान्न कर्मसंज्ञा॥ कारकत्वं च कारकाधिकारपठित संज्ञावत्त्वमेव। न तु क्रि
यान्वयित्वं। प्रथमायामपि कारकत्वापत्तेः॥ न चेष्टापत्तिः। संबोधने तत्त्वे त्वोर्थः कारकं प्रथमे
वेति। धातुसंबंधाधिकारनिष्पन्नमसमस्तनञ् इत्यादौ संबोधनपदस्य व्यर्थतापत्तेः। क्वेत्वोर्थादाना
मपि क्रियाचयित्वे कारकत्वापत्तेः। तथा च पितृवद्वीरित्यादौ यणाद्यापत्तिः। कारकाद्दत्तश्रुतयोरि
त्यादौ कारकशब्दे स्वरितत्वात् अप्रयोगोरवाद्व। किं च क्रियान्वयः साक्षाद्दत्तपरंपरा संबंधेनापि। ना
द्यः सप्तम्या अकारकत्वापत्तेः। नान्त्यः षष्ठ्या अपि कारकत्वापत्तेः। सप्तम्याः कर्तृकर्मद्वारकक्रि राम:
यान्वयः षष्ठ्याश्च नेति अत्र विनिगमकत्वाभावात्। न च तदन्वयप्रयोग्यतावच्छेदकक्रियाजनक ९७

त्ववदित्यर्थ इति नव्यानव्याख्यानमप्ययुक्तं । षष्ठ्यादिव्यावृत्तयोग्यतायाः वक्तुमशक्यत्वा
त् । मदुक्तलक्षणे तु कारक इत्यधिकारसूत्रेणैव विधर्मावच्छिन्नहणोनकोपि दोषः । षष्ठ्यादि
दधिकारपठितत्वाभावात् । त्वयापि तत्स्वीकारे प्रथमायाः अकारकत्वापत्तिः तथा च भव
त्सिद्धान्तहानिः रिति दिक् । हरिं भजतीति । एककर्तृका हरिनिष्ठप्रीत्यनुकूला क्रियेति बोधः
। तिङन्ते सर्वत्र फलनिष्ठप्रकारतानिरूपितविशेष्यतायाः सर्वैः क्रियायां स्वीकारात्
। एवं च हरिः सेव्यत इत्यत्रापि पूर्वोक्त एव बोधः । पूर्वोदाहरणे द्वितीया कर्मबोधिका । द्वितीये तु आख्या
त इति विशेषः तार्किकास्तु भक्तनिष्ठक्रियाजन्यप्रीत्याश्रयो हरिरिति प्रथमान्तार्थविशेष्यकबोध
माहुः । तन्न तत्क्रियाप्रधानमाख्यातं सत्वप्रधानानि नामानीति वचनविरोधः । आख्यातं सख्या
प्रकारकबोधं प्रथमान्तपदजन्योपस्थितिः किं च फलस्य क्रियात्वे विशेष्यत्वे च तत्रैव प्रत्ययार्थ
विशेष्यत्वेन वर्तमानत्वादेरन्वयः स्यात् ॥ किं च प्रधानीभूतधात्वर्थव्यापाराश्रयत्वेनौदनादे
कर्तृत्वस्यापत्तेः । न स्याच्चेद्देवदत्तादेरप्रधानव्यापाराश्रयत्वात् ॥ किं च पाको भवतीत्यर्थे पका

नं. ८३

तर्कचन्द्रिका रणमितियद्द्वयघटितकार्यकारणभावकल्पने गौरवं चानवीनशाब्दिकास्तु मत्कनिष्ठक्रियाजन्या
हरिनिष्ठप्राप्तिरितिफलविशेष्यकं बोधमाहुः॥ तत्र मनोरमादिसकलग्रंथविरोधः क्रि
९८ याप्रधानमितिवचनविरोधश्च क्रियात्वं च फलविशेष्यकं निरूपकार्यतानिरूपितकार
णतावच्छेदकतयासिद्धो जातिविशेषः अखंडोपाधिर्वा न च सः कलेत्यनेन वचनं संगच्छे
ताऽस्मिन्विकल्पेपि प्रयोगस्तु सिंहो माणवक इतिवद्गौणः॥ न च सुप आत्मनः क्यजितिसु
त्रस्य भाष्यानुरोधात्तथा व्याख्यातमिति वाच्यं। तस्यान्याभिप्रायकत्वात्। तथाहि तत्र ही
ष्यते पुत्र इत्यत्र पुत्रमिच्छतीत्यत्रेव कर्मतापत्तिमाशंक्याभिन्नार्थत्वादिति समाहितं। तत्र चापु
त्रीयतीत्यस्माद्यावानर्थः प्रतीयते कर्तृकर्मादिरूपः स सर्वोपि पुत्रमिच्छतीत्यस्मात्सद्द्वय
घटितवाक्यादपि प्रतीयते। इष्यते पुत्र इति वाक्यात्तु न कर्तृप्रतीतिरिति भिन्नार्थत्वान्न चैतत्रा
पि कर्त्राक्षेपात्समानार्थत्वं। लाघवात्पदद्वयघटितविग्रहे चरितार्थो विधिः पदत्रयघटि राम०
तविग्रहेन प्रवर्तत इत्यभिप्रायात्॥ तस्मात्फलविशेष्यबोधो संगत इति दिक्॥ स्पष्टं चेदम ९८

१४४